# TaittiriyAranyakam aruNaprashnaH

# तैत्तिरीयारण्यकम् अरुणप्रश्नः

## Document Information

Text title : taittirIya AraNyaka 1 aruNaprashnaH

File name : aranyaka.itx

Category : veda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer

Proofread by : Rajagopal Iyer

Description-comments : The Mantrams of AaruNam (AaruNa Kethuka Saayanam) deal largely with Surya UpAsanA. That is why it is called Surya Upanishad.

Latest update : February 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 18, 2025

*sanskritdocuments.org*

# तैत्तिरीयारण्यकम् अरुणप्रश्नः

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु॥
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः ॥ १ ॥

अग्निर्वायुश्च सूर्यश्च । सह संचस्करर्द्धिया ।
वाय्वश्वा रश्मिपतयः । मरीच्यात्मनो अद्रुहः ।
देवीर्भुवनसूवरीः । पुत्रवत्वाय मे सुत ।
महानाम्नीर्महामानाः । महसो महसस्स्वः ।
देवीः पर्जन्यसूवरीः । पुत्रवत्वाय मे सुत ॥ २ ॥

अपाश्म्युष्णिमपा रक्षः । अपाश्म्युष्णिमपारघम् ।
अपाघ्रामप चावर्तिम् । अपदेवीरितो हित ।
वज्रं देवीरजीताꣳश्च । भुवनं देवसूवरीः ।
आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत ।
शिवानश्शन्तमा भवन्तु । दिव्या आप ओषधयः ।
सुमृडीका सरस्वती । मा ते व्योम संदृशि ॥ ३ ॥

स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् ।
एतैरादित्यमण्डलम् । सर्वैरेव विधास्यते ।
सूर्यो मरीचिमादत्ते । सर्वस्माद्भुवनादधि ।
तस्याः पाकविशेषेण । स्मृतं कालविशेषणम् ।
नदीव प्रभवात्काचित् । अक्षय्यात्स्यन्दते यथा ॥ ४ ॥
तान्नद्योऽभिसमायन्ति । सोरुस्सती न निवर्तते ।
एवन्नानासमुत्थानाः ।
कालास्संवत्सरꣳ श्रिताः । अणुशश्च महशश्च ।
सर्वे समवयन्त्रितम् । सतैस्सर्वैस्समाविष्टः ।
ऊरुस्सन्न निवर्तते अधिसंवत्सरं विद्यात् । तदेव लक्षणे ॥ ५ ॥
अणुभिश्च महद्भिश्च । समारूढः प्रदृश्यते ।
संवत्सरः प्रत्यक्षेण । नाधिसत्वः प्रदृश्यते ।
पटरो विक्लिधः पिङ्गः । एतद्वरुणलक्षणम् ।
यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते ।
एकꣳ हि शिरो नाना मुखे । कृत्स्नम् तदृतुलक्षणम् ॥ ६ ॥
उभयतस्सप्तेन्द्रियाणि । जल्पितं त्वेव दिह्यते ।
शुक्लकृष्णे संवत्सरस्य । दक्षिणवामयोः पार्श्वयोः ।
तस्यैषा भवति । शुक्रं ते अन्यद्यजतं ते अन्यत् ।
विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावः ।
भद्रा ते पूषन्निह रातिरस्त्विति । नात्र भुवनम् । न पूषा ।
न पशवः । नादित्यस्संवत्सर एव प्रयक्षेण प्रियतमं विद्यात् ।
एतद्वै संवत्सरस्य प्रियतमꣳ रूपम् । योऽस्य महानर्थ उत्पत्स्यमानो भवति ।
इदं पुण्यं कुरुष्वेति । तमाहरणं दद्यात् ॥ ७ ॥
साकंजानाꣳ सप्तथमाहुरेकजम् । षडुद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः । स्थात्रे रेजन्ते विकृतानि रूपशः ।
को नु मर्या अमिथितः । सखा सखायमब्रवीत् ।
जहाको अस्म दीषते । यस्तित्याज सखिविदꣳ सखायाम् ।

न तस्य वाच्यपि भागो अस्ति । यदीꣳ शृणोत्यलकꣳ शृणोति ॥ ८ ॥

न हि प्रवेद सुकृतस्य पन्थामिति । ऋतुर्ऋतुना नुद्यमानः ।
विननादाभिधावः । षष्टिश्च त्रिꣳशका वल्गाः ।
शुक्लकृष्णौ च षाष्टिकौ । सारागवस्त्रैर्जरदक्षः ।
वसन्तो वसुभिस्सह ।
संवत्सरस्य सवितुः ।
प्रैषकृत्प्रथमः स्मृतः । अमूनादयतेत्यन्यान् ॥ ९ ॥

अमूꣳश्च परिरक्षतः । एता वाचः प्रयुज्यन्ते ।
यत्रैतदुपदृश्यते । एतदेव विजानीयात् ।
प्रमाणं कालपर्यये । विशेषणं तु वक्ष्यामः ।
ऋतूनां तन्निबोधत । शुक्लवासा रुद्रगणः ।
ग्रीष्मेणाऽऽवर्तते सह । निजहन् पृथिवीꣳ सर्वाम् ॥ १० ॥

ज्योतिषाऽप्रतिख्येन सः । विश्वरूपणि वासाꣳसि ।
आदित्यानां निबोधत । संवत्सरीणं कर्मफलम् ।
वर्षाभिर्ददताꣳ सह । अदुःखो दुःखचक्षुरिव ।
तद्माऽऽपीत इव दृश्यते । शीतेनाव्यथयन्निव ।
रुरुदक्ष इव दृश्यते । ह्लादयते ज्वलतश्चैव ।
शाम्यतश्चास्य चक्षुषी । या वै प्रजा भ्रꣳश्यन्ते ।
संवत्सराता भ्रꣳश्यन्ते । याः प्रतितिष्ठन्ति ।
संवत्सरे ताः प्रतितिष्ठन्ति । वर्षाभ्य इत्यर्थः ॥ ११ ॥

अक्षिदुःखोत्थितस्यैव । विप्रसन्ने कनीनिके ।
आङ्क्ते चाद्गणं नास्ति । ऋभूणां तन्निबोधत ।
कनकाभानि वासाꣳसि । अहतानि निबोधत ।
अन्नमश्नीत मृज्मीत । अहं वो जीवनप्रदः ।
एता वाचः प्रयुज्यन्ते । शरद्यत्रोपदृश्यते ॥ १२ ॥

अभिधून्वन्तोऽभिघ्नन्त इव । वातवन्तो मरुद्गणाः ।
अमुतो जेतुमिषुमुखामिव । सन्नद्धास्सह ददृशे ह ।

अपध्वस्तैर्वस्तिवर्णैरिव । विशिखासः कपर्दिनः ।
अक्रुद्धस्य योत्स्यमानस्य । क्रुद्धस्येव लोहिनी ।
हेमतश्चक्षुषी विद्यात् । अक्ष्णयोः क्षिपणोरिव ॥ १३ ॥
दुर्भिक्षं देवलोकेषु । मनूनामुदकं गृहे ।
एता वाचः प्रवदन्तीः । वैद्युतो यान्ति शैशिरीः ।
ता अग्निः पवमना अन्वैक्षत । इह जीविकामपरिपश्यन् ।
तस्यैषा भवति । इहेहवस्स्वतपसः ।
मरुतस्सूर्यत्वचः । शर्म सप्रथा आवृणे ॥ १४ ॥
अतिताम्राणि वासाꣳसि । अष्टिवज्रिशतघ्नि च ।
विश्वे देवा विप्रहरन्ति । अग्निजिह्वा असश्चत ।
नैव देवो न मर्त्यः । न राजा वरुणो विभुः ।
नाग्निर्नेन्द्रो न पवमानः । मातृक्कचन विद्यते ।
दिव्यस्यैका धनुरार्त्निः । पृथिव्यामपरा श्रिता ॥ १५ ॥
तस्येन्द्रो वम्रिरूपेण । धनुर्ज्यामछिनथ्स्वयम् ।
तदिन्द्रधनुरित्यज्यम् । अभ्रवर्णेषु चक्षते ।
एतदेव शंयोर्बार्हस्पत्यस्य । एतद्रुद्रस्य धनुः ।
रुद्रस्य त्वेव धनुरार्त्निः । शिर उत्पिपेष ।
स प्रवर्ग्योऽभवत् । तस्माद्यस्सप्रवर्ग्येण यज्ञेन यजते ।
रुद्रस्य स शिरः प्रतिदधाति । नैनꣳरुद्र आरुको भवति । य एवं वेद ॥ १६ ॥
अत्यूर्ध्वाक्षोऽतिरश्चात् । शिशिरः प्रदृश्यते ।
नैव रूपं न वासाꣳसि । न चक्षुः प्रतिदृश्यते ।
अन्योन्यं तु न हिꣳस्रातः । सतस्तद्देवलक्षणम् ।
लोहितोऽक्ष्णि शारशीर्ष्णिः । सूर्यस्योदयनं प्रति ।
त्वं करोषिन्यञ्जलिकाम् । त्वं करोषि निजानुकाम् ॥ १७ ॥
निजानुकामेन्यञ्जलिका । अमी वाचमुपासतामिति ।
तस्मै सर्व ऋतवो नमन्ते । मर्यादाकरत्वात्प्रपुरोधाम् ।
ब्राह्मण आप्नोति । य एवं वेद । स खलु संवत्सर एतैस्सेनानीभिस्सह ।

इन्द्राय सर्वान्कामानभिवहति । स द्रप्सः । तस्यैषा भवति ॥ १८ ॥

अवद्रप्सो अꣳशुमतीमतिष्ठत् । इयानः कृष्णो दशभिस्सहस्रैः ।
आवर्तमिन्द्रः शच्या धमन्तम् । उपस्नुहि तं नृमणामथद्रामिती ।
एतयैवेन्द्रः सलावृक्या सह । असुरान् परिवृश्चति ।
पृथिव्य ꣳशुमती । तामन्ववस्थितः संवत्सरो दिवं च ।
नैवं विदुषाऽऽचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम् । यो द्रुह्यति ।
भ्रश्यते स्वर्गाल्लोकात् । इत्यृतुमण्डलानि ।
सूर्यमण्डलान्याख्यायिकाः । अत ऊर्ध्वꣳ सनिर्वचनाः ॥१९ ॥

आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिषिमान् विभासः ।
ते अस्मै सर्वे दिवमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति ।
कश्यपोऽष्टमः । स महामेरुं न जहाति ।
तस्यैषा भवति । यत्ते शिल्पंकश्यप रोचनावत् ।
इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्त्सूर्या अर्पितास्सप्त साकम् ॥ २० ॥

तस्मिन् राजानमधिविश्रयेममिति । ते अस्मै सर्वे कश्यपाज्ज्योतिर्लभन्ते ।
तान्त्सोमः कश्यपादधिनिर्द्धमति । भ्रस्ताकर्मकृदिवैवम् ।
प्राणो जीवानीन्द्रियजीवानि । सप्त शीर्षण्याः प्राणाः ।
सूर्या इत्याचार्याः । अपश्यमहमेतान्त्सप्त सूर्यानिति ।
पञ्चकर्णो वात्स्यायनः । सप्तकर्णश्च प्लाक्षिः ॥ २१ ॥

See a note in the end on adding t before sapta for apashyamahametAntsapta

आनुश्राविक एव नौ कश्यप इति । उभौ वेदयिते ।
न हि शेकुमिव महामेरुं गन्तुम् । अपश्यमहमेत्सूर्यमण्डलं परिवर्तमानम् ।
गार्ग्यः प्राणत्रातः । गच्छन्त महामेरुम् । एकं चाजहतम् ।
भ्राजपटरपतङ्गा निहने । तिष्ठन्नातपन्ति । तस्मादिह तप्त्रितपाः ॥ २२ ॥

अमुत्रेतरे । तस्मादिहातप्त्रितपाः । तेषामेषा भवति ।
सप्त सूर्या दिवमनुप्रविष्टाः । तानन्वेति पथिभिर्दक्षिणावान् ।
ते अस्मै सर्वे घृतमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति ।
सप्तर्त्विजस्सूर्या इत्याचार्याः । तेषामेषा भवति । सप्त दिशो नानासूर्याः ॥ २३ ॥

सप्त होतार ऋत्विजः । देवा आदित्या ये सप्त ।
तेभिस्सोमाभीरक्षण इति । तदप्याम्नायः ।
दिग्भ्राज ऋतून् करोति । एतयैवावृता सहस्रसूर्यताया इति वैशंपायनः ।
तस्यैषा भवति । यद्याव इन्द्र ते शतꣳशतं भूमीः ।
उतस्युः । नत्वा वज्रिन् सहस्रꣳ सूर्याः ॥ २४ ॥

अनुनजातमष्ट रोदसी इति । नानालिङ्गत्वादृतूनां नानासूर्यत्वम् ।
अष्टौ तु व्यवसिता इति । सूर्यमण्डलान्यष्टात ऊर्ध्वम् ।
तेषामेषा भवति । चित्रं देवानामुदगादनीकम् ।
चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षम् ।
सूर्य आत्मा जगतस्तस्थुषश्चेति ॥२५ ॥

क्वेदमभ्रन्निविशते । क्वायꣳसंवत्सरो मिथः ।
क्वाहः क्वेयन्देव रात्री । क्व मासा ऋतवः श्रिताः ।
अर्द्धमासा मुहूर्ताः । निमेषास्तुटिभिस्सह ।
क्वेमा आपो निविशन्ते । यदीतो यान्ति सम्प्रति ।
काला अप्सुनिविशन्ते । आपस्सूर्ये समाहिताः ॥ २६ ॥

अभ्राण्यपः प्रपद्यन्ते । विद्युत्सूर्ये समाहिता ।
अनवर्णे इमे भूमी । इयं चाऽसौ च रोदसि ।
किꣳस्विदत्रान्तरा भूतम् । येनेमे विधृते उभे ।
विष्णुना विधृते भूमी । इति वत्सस्य वेदना ।
इरावती धेनुमती हि भूतम् । सूयवसिनी मनुषे दशस्ये ॥ २७ ॥

व्यष्टभ्नाद्रोदसी विष्णवेते । दाधर्थ पृथिवीमभितो मयूखैः ।
किन्तद्विष्णोर्बलमाहुः । का दीप्तिः किं परायणम् ।
एको यद्धारयद्देवः । रेजती रोदसी उभे ।
वाताद्विष्णोर्बलमाहुः । अक्षराद्दीप्तिरुच्यते ।
त्रिपदाद्धारयद्देवः । यद्विष्णोरेकमुत्तमम् ॥ २८ ॥

अग्नयो वायवश्चैव । एतदस्य परायणम् ।

पृच्छामि त्वा परं मृत्युम् । अवमं मध्यमश्चतुम् ।
लोकञ्च पुण्यपापानाम् । एतत्पृच्छामि सम्प्रति ।
अमुमाहुः परं मृत्युम् । पवमानं तु मध्यमम् ।
अग्निरेवावमो मृत्युः । चन्द्रमाश्चतुरुच्यते ॥ २९ ॥

अनाभोगाः परं मृत्युम् । पापास्संयन्ति सर्वदा ।
आभोगास्त्वेव संयन्ति । यत्र पुण्यकृतो जनाः ।
ततो मध्यममायन्ति । चतुमग्निं च सम्प्रति ।
पृच्छामि त्वा पापकृतः । यत्र यातयते यमः ।
त्वन्नस्तद्ब्रह्मन् प्रब्रूहि । यदि वेत्थाऽसतो गृहन् ॥ ३० ॥

कश्यपादुदितास्सूर्याः । पापान्निर्घ्नन्ति सर्वदा ।
रोदस्योन्तर्देशेषु । तत्र न्यस्यन्ते वासवैः ।
तेऽशरीराः प्रपद्यन्ते । यथाऽपुण्यस्य कर्मणः ।
अपाण्यपादकेशासः । तत्र तेयोनिजा जनाः ।
मृत्वा पुनर्मृत्युमापद्यन्ते । अद्यमानास्स्वकर्मभिः ॥ ३१ ॥

आशातिकाः क्रिमय इव । ततः पूयन्ते वासवैः अपैतं मृत्युं जयति ।
य एवं वेद । स खल्वैवं विद्वाह्मणः । दीर्घश्रुत्तमो भवति ।
कश्यपस्यातिथिस्सिद्धगमनस्सिद्धगमनः । तस्यैषा भवति ।
आयस्मिन्थ्सप्त वासवाः । रोहन्ति पूर्व्या रुहः ॥ ३२ ॥

ऋषिर् ह दीर्घश्रुत्तमः । इन्द्रस्य घर्मो अतिथिरिति ।
कश्यपः पश्यको भवति । यत्सर्वं परिपश्यतीति सौक्ष्म्यात् ।
अथाग्नेरष्टपुरुषस्य । तस्यैषा भवति ।
अग्ने नय सुपथा राये अस्मान् । विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठन्ते नम उक्तिं विधेमेति ॥ ३३ ॥

अग्निश्च जातवेदाश्च । सहोजा अजिराप्रभुः । वैश्वानरो नर्यापाश्च ।
पङ्क्तिराधाश्च सप्तमः विसर्पेवाऽष्टमोऽग्नीनाम् ।
एतेऽष्टौ वसवः क्षिता इति । यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः ।
नीलार्चिश्च पीतकार्चिश्चेति । अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य ।

प्रभ्राजमाना व्यवदाताः ॥ ३४ ॥

याश्च वासुकिवैद्युताः । रजताः परुषाः श्यामाः । कपिला अतिलोहिताः ।
ऊर्ध्वा अवपतन्ताश्च । वैद्युत इत्येकादश । नैनं वैद्युतो हिनस्ति ।
य एवं वेद । स होवाच व्यासः पाराशर्यः ।
विद्युद्वधमेवाहं मृत्युमैच्छमिति । न त्वकामꣳ हन्ति ॥ ३५ ॥

य एवं वेद । अथ गन्धर्वगणाः । स्वानभ्राट् ।
अङ्गारिर्बम्भारिः । हस्तस्सुहस्तः । कृशानुर्विश्वावसुः ।
मूर्धन्वान्थ्सूर्यवर्चाः । कृतिरित्येकादश गन्धर्वगणाः ।
देवाश्च महादेवाः । रश्मयश्च देवा गरगिरः ॥३६ ॥

नैनं गिरो हिनस्ति । य एवं वेद ।
गौरी मिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी । सस्राक्षरा परमे व्योमन्निति ।
वाचो विशेषणम् । अथ निगदव्याख्याताः ।
ताननुक्रमिष्यामः । वराहवस्स्वतपसः ॥ ३७ ॥

विद्युन्महसो धूपयः । श्वापयो गृहमेधाश्चेत्येते ।
ये चेमेऽशिमिविद्विषः । पर्जन्यास्सप्त पृथिवीमभिवर्षन्ति ।
वृष्टिभिरिति । एतयैव विभक्तिविपरीताः । सप्तभिर्वा तैरुदीरिताः ।
अमूल्लोकानभिवर्षन्ति । तेशामेषा भवति । समानमेतदुदकम् ॥ ३८ ॥

उच्चैत्यवचाहभिः । भूमिं पर्जन्या जिन्वन्ति । दिवं जिन्वन्त्यग्नय इति ।
यदक्षरं भूतकृतम् । विश्वे देवा उपासते । महर्षिमस्य गोप्तारम् ।
जमदग्निमकुर्वत । जमदग्निराप्यायते ।
छन्दोभिश्चतुरुत्तरैः । राज्ञस्सोमस्य तृप्तासः ॥ ३९ ॥

ब्रह्मणा वीर्यावता । शिवा नः प्रदिशो दिशः ।
तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये ।
दैवीस्स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।
शन्नो अस्तु द्विपदे । शं चतुष्पदे ।

सोमपा ( ३ ) असोमपा ( ३ ) इति निगदव्याख्याताः ॥ ४० ॥

सहस्रवृदियं भूमिः । परं व्योम सहस्रवृत् । अश्विना भुज्यूनासत्या ।
विश्वस्य जगतस्पती । जाया भूमिः पतिर्व्योम । मिथुनन्ता अतुर्यथुः ।
पुत्रो बृहस्पती रुद्रः । सरमा इति स्त्रीपुमम् ।
शुक्र,न् वामन्यद्यजं वामन्यत् । विषुरूपे अहनी द्यौरिव स्थः ॥ ४१ ॥

विश्वा हि माया अवथः स्वधावन्तौ ।
भद्रा वां पूषणाविहरातिरस्तु वासात्यौ चित्रौ जगतो निधानौ ।
द्यावाभूमी चरथः सꣳ सखायौ । तावश्विना रासभाश्वा हवं मे ।
शुभस्पती आगतꣳसूर्यया सह । त्युग्रोह भुज्युमश्विनोदमेघे ।
रयिन्न कश्चिन्ममृवां ( २ ) अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिः ।
अन्तरिक्षप्रुद्भिरपोदकाभिः ॥ ४२
तिस्रः क्षपस्त्रिरहातिव्रजद्भिः । नासत्या भुज्युमूहथुः पतङ्गैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे । त्रिभीरथैश्शतपद्भिः षडश्वैः ।
सवितारं वितन्वन्तम् । अनुबध्नाति शांबरः । आपपूर्षंबरश्चैव ।
सवितारेपसोऽभवत् । त्यꣳ सुतृप्तं विदित्वैव । बहुसोम गिरं वशी ॥ ४३ ॥

अन्वेति तुग्रो वक्रियान्तम् । आयसूयान्त्सोमतृप्सुषु । स सङ्ग्रामस्तमोद्योऽत्योतः ।
वाचो गाः पिपाति तत् । स तद्गोभिस्स्ताऽत्येत्यन्ये । रक्षसानन्विताश्च ये ।
अन्वेति परिवृत्याऽस्तः । एवमेतौस्थो अश्विना ।
ते एते द्युःपृथिव्योः । अहरहर्गर्भन्दधाथे ॥ ४४ ॥

तयोरेतौ वत्सावहोरात्रे । पृथिव्या अहः । दिवो रात्रिः ।
ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वत्सौ ।
अग्निश्चादित्यश्च । रात्रेर्वत्सः । श्वेत आदित्यः । अहोऽग्निः ॥ ४५ ॥

ताम्रो अरुणः । ता अविसृष्टौ । दम्पती एव भवतः ।
तयोरेतौ वत्सौ । वृत्रश्च वैद्युतश्च । अग्नेर्वृत्रः । वैद्युत आदित्यस्य ।
ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वत्सौ ॥ ४६ ॥

उष्मा च नीहारश्च । वृत्रस्योष्मा । वैद्युतस्य नीहारः ।

तौ तावेव प्रतिपद्येते । सेयꣳरात्री गर्भिणी पुत्रेण संवसति ।
तस्या वा एतदुल्बणम् । यद्रात्रौ रश्मयः ।
यथा गोर्गर्भिण्या उल्बणम् । एवमेतस्या उल्बणम् ।
प्रजयिष्णुः प्रजया च पशुभिश्च भवति ।
य एवं वेद । एतमुद्यन्तमपियन्तं चेति ।
आदित्यः पुण्यस्य वत्सः । अथ पवित्राङ्गिरसः ॥ ४७ ॥

पवित्रवन्तः परिवाजमासते । पितैषां प्रत्नो अभिरक्षति व्रतम् ।
महस्समुद्रं वरुणस्तिरोदधे । धीरा इच्छेकुर्धरुणेष्वारभम् ।
पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषिविश्वतः ।
अतप्ततनूर्न तदामो अश्नुते । शृतास इद्वहन्तस्तत्समाशत ।
ब्रह्मा देवानाम् । असतस्सद्ये ततक्षुः ॥ ४८ ॥

ऋशयस्सप्तात्रिश्च यत् । सर्वेऽत्रयो अगस्त्यश्च ।
नक्षत्रैश्शङ्कृतोऽवसन् । अथ सवितुः श्यावाश्वस्याऽवर्तिकामस्य ।
अमी य ऋक्षा निहितास उच्चा । नक्तं ददृश्रे कुहाचिद्दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि । विचाकशच्चन्द्रमा नक्षत्रमेति ।
तत्सवितुर्वरेण्यं । भर्गो देवस्य धीमहि ॥ ४९ ॥

धियो यो नः प्रचोदयात् । तत्सवितुर्वृणीमहे ।
वयन्देवस्य भोजनम् । श्रेष्ठꣳसर्वधातमम् ।
तुरं भगस्य धीमहि । अपागूहत सविता तृभीन् ।
सर्वांदिवो अन्धसः । नक्तन्तान्यभवन्दृशे ।
अस्थ्यस्थ्ना संभविष्यामः । नाम नामैव नाम मे ॥ ५० ॥

नपुꣳसकं पुमाꣳस्त्र्यस्मि । स्थावरोऽस्म्यथ जङ्गमः ।
यजेऽयक्षि यष्टाहे च । मया भूतान्ययक्षत ।
पशवो मम भूतानि । अनूबन्ध्योऽस्म्यहं विभुः ।
स्त्रियस्सतीः । ता उमे पुꣳस आहुः ।
पश्यदक्षण्वान्नविचेतदन्धः । कविर्यः पुत्रस्य इमा चिकेत ॥ ५१ ॥
यस्ता विजानाथ्सवितुः पितासत् । अन्धो मणिमविन्दत् ।

तमनङ्गुलिरावयत् । अग्रीवः प्रत्यमुञ्चत् ।
तमजिह्वा असश्चत । ऊर्ध्वमूलमवाक्छाखम् ।
वृक्षं यो वेद सम्प्रति । न स जातु जनः श्रद्दध्यात् ।
मृत्युर्मा मारयादिति । हसितꣳ रुदितङ्गीतम् ॥ ५२ ॥

वीणापणवलासितम् । मृतञ्जीवं च यत्किंचित्
अङ्गानि स्नेव विद्धि तत् । अतृष्यꣳस्तृष्यध्यायत् ।
अस्माज्जाता मे मिथू चरन्न् । पुत्रो निर्ऋत्या वैदेहः ।
अचेता यश्च चेतनः । स तं मणिमविन्दत् ।
सोऽनङ्गुलिरावयत् । सोऽग्रीवः प्रत्यमुञ्चत् ॥ ५३ ॥

सोऽजिह्वो असश्चत । नैतमृशिं विदित्वा नगरं प्रविशेत् ।
यदि प्रविशेत् । मिथौ चरित्वा प्रविशेत् ।
तथ्सम्भवस्यं व्रतम् । आतमग्ने रथन्तिष्ठ ।
एकाश्वमेकयोजनम् । एकचक्रमेकधुरम् ।
वातध्राजिगतिं विभो । न रिष्यति न व्यथते ॥ ५४ ॥

नास्याक्षो यातु सज्जति । यच्छ्वेतान्रोहिताꣳश्चाग्नेः ।
रथे युक्त्वाऽधितिष्ठति । एकया च दशभिश्च स्वभूते ।
द्वाभ्यामिष्टये विꣳशत्या च । तिसृभिश्च वहसे त्रिꣳशता च ।
नियुद्भिर्वायविहिता विमुञ्च ॥ ५५ ॥

आतनुष्व प्रतनुष्व । उद्धमाऽऽधम सन्धम ।
आदित्ये चन्द्रवर्णानाम् । गर्भमाधेहि यः पुमान् ।
इतस्सिक्तꣳ सूर्यगतम् । चन्द्रमसे रसङ्कृधि ।
वारादञ्जनयाग्रेऽग्निम् । य एको रुद्र उच्यते ।
असङ्ख्यातास्सहस्राणि । स्मर्यते न च दृश्यते ॥ ५६ ॥

एवमेतन्निबोधत । आमन्द्रैरिन्द्र हरिभिः ।
याहि मयूररोमभिः । मा त्वा केचिन्नियेमुरिन्न पाशिनः ।
दधन्वेव ता इहि । मा मन्द्रैरिन्द्र हरिभिः ।
यामि मयूररोमभिः । मा मा केचिन्नियेमुरिन्न पाशिनः ।

निधन्वेव तां ( २ ) इमि । अणुभिश्च महद्भिश्च ॥ ५७ ॥

निघृष्वैरसमायुतैः । कालैर्हरित्वमापन्नैः ।
इन्द्रायाहि सहस्रयुक् । अग्निर्विभ्राष्टिवसनः ।
वायुश्श्वेतसिकद्रुकः । संवथ्सरो विषूवर्णैः ।
नित्यस्तेऽनुचरास्तव । सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सुब्रह्मण्योम् ।
इन्द्रागच्छ हरिव आगच्छ मेधातिथेः । मेष वृषणश्वस्य मेने ॥ ५८ ॥

गौरावस्कन्दिन्नहल्यायै जार । कौशिकब्रह्मण गौतमब्रुवाण ।
अरुणाश्व इहागताः । वसवः पृथिविक्षितः ।
अष्टौदिग्वाससोऽग्नयः । अग्निश्च जातवेदाश्चेत्येते ।
तम्राश्वास्ताम्ररथाः । ताम्रवर्णास्तथाऽसिताः ।
दण्डहस्ताः ख्यादग्दतः । इतो रुद्राः पराङ्गताः ॥ ५९ ॥

उक्तꣳ स्थानं प्रमाणञ्च पुर इत । बृहस्पतिश्च सविता च ।
विश्वरूपैरिहागताम् । रथोनोदकवर्त्मना ।
अप्सुषा इति तद्द्वयोः । उक्तो वेषो वासाꣳसि च ।
कालावयवानामितः प्रतीज्या । वासात्या इत्यश्विनोः ।
कोऽन्तरिक्षे श्ब्दङ्करोतीति । वसिष्टो रौहिणो मीमाꣳसाञ्चक्रे ।
तस्यैषा भवति । वाश्रेव विद्युदिति ।
ब्रह्मण उदरणमसि । ब्रहंअण उदीरणमसि ।
ब्रह्मण आस्तरणमसि । ब्रह्मण उपस्तरणमसि ॥ ६० ॥

[ अपक्रामत गर्भिण्यः ]
अष्टयोनीमष्टपुत्राम् । अष्टपत्नीमिमां महीम् ।
अहं वेद न मे मृत्युः । नचामृत्युरघाहरत् ।
अष्टयोन्यष्टपुत्रम् । अष्टपदिदमन्तरिक्षम् ।
अहं वेद न मे मृत्युः । नचामृत्युरघाहरत् ।
अष्टयोनीमष्टपुत्राम् । अष्टपत्नीममून्दिवम् ॥ ६१ ॥

अहं वेद न मे मृत्युः । नचामृत्युरघाहरत् ।
सुत्रामाणां महीमूषु । अदितिर्द्यौर्दितिरन्तरिक्षम् ।

अदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्चजनाः ।
अदितिर्जातमदितिर्जनित्वम् । अष्टौ पुत्रासो अदितेः ।
ये जातास्तन्वः परि । देवं (२) उपप्रैत्सप्तभिः ॥ ६२ ॥
परा मार्ताण्डमास्यत् । सप्तभिः पुत्रैरदितिः ।
उपप्रैत्पूर्व्यं युगम् । प्रजायै मृत्यवे तत् ।
परा मार्ताण्डमाभरदिति । ताननुक्रमिष्यामः ।
मित्रश्च वरुणश्च । धाता चार्यमा च ।
अँशश्च भगश्च । इन्द्रश्च विवस्वाँश्चेत्येते ।
हिरण्य गर्भो हँसश्शुचिषत् ।
ब्रह्मजज्ञानं तदित्पदमिति गर्भ प्राजापत्यः ।
अथ पुरुषः सप्त पुरुषः ॥ ६३ ॥
[यथास्थानं गर्भिण्यः]
योऽसौ तपन्नुदेति । स सर्वेषां भूतानां प्राणानादायोदेति ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणानादायोदगाः ।
असौ योऽस्तमेति । स सर्वेषां भूतानां प्राणानादायाऽस्तमेति ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणानादायाऽस्तङ्गाः ।
असौ य आपूर्यति । स सर्वेषां भूतानां प्राणैरापूर्यति ॥ ६४ ॥
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरापूरिष्ठाः ।
असौ योऽपक्षीयति । स सर्वेषां भूतानां प्राणैरपक्षीयति ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपक्षेष्ठाः ।
अमूनि नक्षत्राणि । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत ॥ ६५ ॥
इमे मासाश्चार्धमासाश्च । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत ।
इम ऋतवः । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत ।
अयँ संवत्सरः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोत्सर्पति च ॥ ६६ ॥

मा मे॑ प्र॒जया॒ मा प॒शूनाम् । मा मम॑ प्रा॒णैर॑प॒प्रसृ॒प मोत्सृ॒प ।
इ॒दमहः॑ । सर्वे॒षां भू॒ताना॑ं प्रा॒णैर॑प॒प्रसर्पति॒ चोत्स॒र्पति॒ च ।
मा मे॑ प्र॒जया॒ मा प॒शूनाम् । मा मम॑ प्रा॒णैर॑प॒प्रसृ॒प मोत्सृ॒प ।
इ॒यꣳ रात्रिः॑ । सर्वे॒षां भू॒ताना॑ं प्रा॒णैर॑प॒प्रसर्पति॒ चोत्स॒र्पति॒ च ।
मा मे॑ प्र॒जया॒ मा प॒शूनाम् । मा मम॑ प्रा॒णैर॑प॒प्रसृ॒प मोत्सृ॒प ।
ॐ भूर्भु॒वस्स्वः॑ । एतद्वो मिथुनं मा नो मिथु॑नꣳ री॒ढ्वम् ॥ ६७ ॥

अथादित्यस्याष्टपु॑रु॒षस्य ।
वसूनामादित्यानꣳ स्थाने स्वतेज॑सा भा॒नि ।
रुद्राणामादित्यानꣳ स्थाने स्वतेज॑सा भा॒नि ।
आदित्यानामादित्यानꣳ स्थाने स्वतेज॑सा भा॒नि ।
सताꣳ स॒त्यानाम् । आदित्यानꣳ स्थाने स्वतेज॑सा भा॒नि ।
अभिधून्वता॑मभि॒घ्नताम् । वातव॑तां म॒रुताम् ।
आदित्यानꣳ स्थाने स्वतेज॑सा भा॒नि ।
ऋभूणामादित्यानꣳ स्थाने स्वतेज॑सा भा॒नि ।
विश्वेषा॑न्देवा॒नाम् । आदित्यानꣳ स्थाने स्वतेज॑सा भा॒नि ।
संवत्स॑रस्य स॒वितुः । आदित्यस्य स्वतेज॑सा भा॒नि ।
ॐ भूर्भु॒वस्स्वः॑ । रश्मयो वो मिथुनं मा नो मिथु॑नꣳ री॒ढ्वम् ॥ ६८ ॥

आरोगस्य स्थाने स्वतेज॑सा भा॒नि । भ्राजस्य स्थाने स्वतेज॑सा भा॒नि ।
पटरस्य स्थाने स्वतेज॑सा भा॒नि । पतङ्गस्य स्थाने स्वतेज॑सा भा॒नि ।
स्वर्णरस्य स्थाने स्वतेज॑सा भा॒नि । ज्योतिषीमतस्य स्थाने स्वतेज॑सा भा॒नि ।
विभासस्य स्थाने स्वतेज॑सा भा॒नि । कश्यपस्य स्थाने स्वतेज॑सा भा॒नि ।
ॐ भूर्भु॒वस्स्वः॑ । आपो वो मिथुनं मा नो मिथु॑नꣳ री॒ढ्वम् ॥ ६९ ॥

अथ वयोरेकादशपुरुषस्यैकादश॑स्त्री॒कस्य ।
प्रभ्राजमानानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
व्यवदातानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
वासुकिवैद्युतानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
रजतानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।

परुषाणाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
श्यामानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
कपिलानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
अतिलोहितानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
ऊर्ध्वानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ॥ ७० ॥

अवपतन्तानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
वैद्युतानाꣳ रुद्राणाꣳ स्थाने स्वतेज॑सा भा॒नि ।
प्रभ्राजमानीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
व्यवदातीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
वासुकिवैद्युतीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
रजतानाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
परुषाणाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
श्यामानाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
कपिलानाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
अतिलोहितीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
ऊर्ध्वानाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
अवपतन्तीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
वैद्युतीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेज॑सा भा॒नि ।
ॐ भूर्भु॒वस्स्वः॑ । रूपाणि वो मिथुनं मा नो मिथु॑नꣳ री॒ढ्वम् ॥ ७१ ॥
अथा॑ग्नेरष्टपु॑रु॒षस्य ।
अग्नेः पूर्वदिश्यस्य स्थाने स्वतेज॑सा भा॒नि ।
जातवेदस उपदिश्यस्य स्थाने स्वतेज॑सा भा॒नि ।
सहोजसो दक्षिणदिश्यस्य स्थाने स्वतेज॑सा भा॒नि ।
अजिराप्रभव उपदिश्यस्य स्थाने स्वतेज॑सा भा॒नि ।
वैश्वानरस्याऽपरदिश्यस्य स्थाने स्वतेज॑सा भा॒नि ।
नर्यापस उपदिश्यस्य स्थाने स्वतेज॑सा भा॒नि ।
पङ्क्तिराधसौदग्दिश्यस्य स्थाने स्वतेज॑सा भा॒नि ।

विसर्पिण उपदिश्यस्य स्थाने स्वतेजसा भानि ।
ॐ भूर्भुवस्स्वः । रूपाणि वो मिथुनं मा नो मिथुनꣳ रीढ्वम् ॥ ७२ ॥

दक्षिणपूर्वस्यान्दिशि विसर्पी नरकः । तस्मान्नः परिपाहि ।
दक्षिणापरस्यां दिश्यविसर्पी नरकः । तस्मान्नः परिपाहि ।
उत्तरपूर्वस्यान्दिशि विषादी नरकः । तस्मान्नः परिपाहि ।
उत्तरपरस्यान्दिश्यविषादी नरकः । तस्मान्नः परिपाहि ।
आ यस्मिन्त्सप्त वासवा इन्द्रियाणि शतक्रतवित्येते ॥ ७३ ॥

इन्द्रघोषा वो वसुभिः पुरस्तादुपदधताम् ।
मनोजवसो वः पितृभिर्दक्षिणत उपदधताम् ।
प्रचेता वो रुद्रैः पश्चादुपदधताम् ।
विश्वकर्मा व आदित्यैरुत्तरत उपदधताम् ।
त्वष्टा वो रूपैरुपरिष्टादुपदधताम् ।
संज्ञानं वः पश्चादिति । आदित्यस्सर्वोऽग्निः पृथिव्याम् ।
वायुरन्तरिक्षे । सूर्यो दिवि । चन्द्रमा दिक्षु ।
नक्षत्राणि स्वलोके । एवा ह्येव । एवा ह्यग्ने ।
एवा हि वायो । एवा हीन्द्र । एवा हि पूषन् । एवा हि देवाः ॥ ७४ ॥

आपमापामपस्सर्वाः । अस्मादस्मादितोऽमुतः
अग्निर्वायुश्च सूर्यश्च । सह सञ्चस्करर्द्धिया ।
वाय्वश्वा रश्मिपतयः । मरीच्यात्मनो अद्रुहः ।
देवीर्भुवनसूवरीः । पुत्रवत्वाय मे सुत ।
महानाम्नीर्महामानाः । महसो महसस्स्वः ॥७५ ॥

देवीः पर्जन्यसूवरीः । पुत्रवत्वाय मे सुत ।
अपाऽश्न्युष्णिमपा रक्षः । अपाऽऽश्न्युष्णिमपारघम् ।
अपाघ्रामपचाऽवर्तिम् । अपदेवीरितो हित ।
वज्रन्देवीरजीताꣳश्च । भुवनन्देवसूवरीः ।
आदित्यानदितिन्देवीम् । योनिनोर्ध्वमुदीषत ॥ ७६ ॥

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
केतवो अरुणासश्च । ऋषयो वातरशनाः ।
प्रतिष्ठाꣳ शतधा हि । समाहितासो सहस्रधायसम् ।
शिवा नश्शन्तमा भवन्तु । दिव्या आप ओषधयः ।
सुमृडीका सरस्वति । मा ते व्योम सन्दृशि ॥ ७७ ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।
चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति । अग्निर्वा अपामायतनम् ।
आयतनवान् भवति । योऽग्नेरायतनं वेद ॥ ७८ ॥

आयतनवान् भवति । आपो वा अग्नेरायतनम् ।
आयतनवान् भवति । य एवं वेद ।
योऽपामायतनं वेद । आयतनवान् भवति ।
वायुर्वा अपामायतनम् । आयतनवान् भवति ।
यो वायोरायतनं वेद । आयतनवान् भवति ॥ ७९ ॥

आपो वै वायोरायतनम् । आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति । असौ वै तपन्नपामायतनम् ।
आयतनवान् भवति । योऽमुष्य तपत आयतनं वेद ।
आयतनवान् भवति । आपो वा अमुष्य तपत आयतनम् ॥ ८० ॥

आयतनवान् भवति । य एवं वेद ।
योऽपामायतनं वेद । आयतनवान् भवति ।
चन्द्रमा वा अपामायतनम् । आयतनवान् भवति ।
यश्चन्द्रमस आयतनं वेद । आयतनवान् भवति ।
आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति ॥ ८१ ॥

य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति । नक्षत्राणि वा अपामायतनम् ।
आयतनवान् भवति । यो नक्षत्राणामायतनं वेद ।
आयतनवान् भवति । आपो वै नक्षत्राणामायतनम् ।
आयतनवान् भवति । य एवं वेद ॥ ८२ ॥

योऽपामायतनं वेद । आयतनवान् भवति
पर्जन्यो वा अपामायतनम् । आयतनवान् भवति ।
यः पर्जन्यस्यायतनं वेद । आयतनवान् भवति ।
आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद ॥ ८३ ॥

आयतनवान् भवति । संवत्सरो वा अपामायतनम् ।
आयतनवान् भवति । यस्संवत्सरस्यायतनं वेद ।
आयतनवान् भवति । आपो वै संवत्सरस्यायतनम् ।
आयतनवान् भवति । य एवं वेद ।
योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥ ८४ ॥

इमे वै लोका अप्सु प्रतिष्ठिताः । तदेषाऽभ्यनूक्ता ।
अपाꣳ रसमुदयꣳ सन्न् । सूर्ये शुक्रꣳ समाभृतम् ।
अपाꣳ रसस्य यो रसः । तं वो गृह्णाम्युत्तममिति ।
इमे वै लोका अपाꣳ रसः । तेऽमुष्मिन्नादित्ये समाभृताः ।
जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयित्वा गुल्फदघ्नम् ॥ ८५ ॥

पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सꣳस्तीर्य । तस्मिन्विहायसे ।
अग्निं प्रणीयोपसमाधाय । ब्रह्मवादिनो वदन्ति ।
कस्मात्प्रणीतेऽयमग्निश्चीयते । साप्रणीतेऽयमप्सु ह्ययश्चीयते ।
असौ भुवनेप्यनाहिताग्निरेताः । तमभित एता अबीष्टका उपदधाति ।
अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु ॥ ८६ ॥

अथो आहुः । सर्वेषु यज्ञक्रतुष्विति ।
एतद्ध स्म वा आहुश्शण्डिलाः । कमग्निञ्चिनुते ।

सत्रियमग्निञ्चिन्वानः । संवत्सरं प्रत्यक्षेण ।
कमग्निञ्चिनुते । सावित्रमग्निञ्चिन्वानः ।
अमुमादित्यं प्रत्यक्षेण । कमग्निञ्चिनुते ॥ ८७ ॥

नाचिकेतमग्निञ्चिन्वानः ।
प्राणान्प्रत्यक्षेण । कमग्निञ्चिनुते । चातुहोत्रियमग्निञ्चिन्वानः ।
ब्रह्म प्रत्यक्षेण । कमग्निञ्चिनुते । वैश्वसृजमग्निञ्चिन्वानः ।
शरीरं प्रत्यक्षेण । कमग्निञ्चिनुते । उपानुवाक्यमाशुमग्निञ्चिन्वानः ॥ ८८ ॥

इमान् लोकान्प्रत्यक्षेण । कमग्निञ्चिनुते । इममारुणकेतुकमग्निञ्चिन्वानः ।
य एवासौ । इतश्चाऽमुतश्चाऽव्यतीपती । तमिति ।
योऽग्नेर्मिथूया वेद । मिथुनवान्भवति ।
आपो वा अग्नेर्मिथूयाः । मिथुनवान्भवति । य एवं वेद ॥ ८९ ॥

आपो वा इदमासन्त्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् ।
तस्यान्तर्मनसि कामस्समवर्तत । इदꣳ सृजेयमिति ।
तस्माद्यत्पुरुषो मनसाभिगच्छति । तद्वाचा वदति ।
तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता ।
कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ॥ ९० ॥

सतो बन्धुमसति निरविन्दन्न् । हृदि प्रतीष्या कवयो मनीषेति ।
उपैनन्तदुपनमति । यत्कामो भवति । य एवं वेद ।
स तपोऽतप्यत । स तपस्तप्त्वा । शरीरमधूनुत । तस्य यन्माꣳसमासीत् ।
ततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन्न् ॥ ९१ ॥

ये नखाः । ते वैखानसाः । ये वालाः । ते वालखिल्याः ।
यो रसः । सोऽपाम् । अन्तरतः कूर्मं भूतꣳ सर्पन्तम् ।
तमब्रवीत् । मम वैत्वङ्माꣳसा । समभूत् ॥ ९२ ॥

नेत्यब्रवीत्।पूर्वमेवाहमिहासमिति ।
तत्पुरुषस्य पुरुषत्वम् । स सहस्रशीर्षा पुरुषः ।
सहस्राक्षस्सहस्रपात् । भूत्वोदतिष्ठत् ।

तमब्रवीत् । त्वं वै पूर्वꣳ सम्भूः ।
त्वमिदं पूर्वः कुरुष्वेति । स इत आदायापः । ॥ १३ ॥

अञ्जलिना पुरस्तादुपादधात् । एवाह्येवेति ।
तत आदित्य उदतिष्ठत् । सा प्राची दिक् ।
अथाऽरुणः । केतुर्दक्षिणत उपादधात् ।
एवाह्यग्न इति । ततो वा अग्निरुदतिष्ठत् ।
सा दक्षिणा दिक् । अथारुणः केतुः पश्चादुपदधात् ।
एवाहि वायो इति ॥ १४ ॥

ततो वायुरुदतिष्ठत् । सा प्रतीची दिक् ।
अथारुणः केतुरुत्तरत उपादधात् । एवाहीन्द्रेति ।
ततो वा इन्द्र उदतिष्ठत् । सोदीची दिक् ।
अथारुणः केतुर्मध्य उपादधात् ।  एवाहि पूषन्निति ।
ततो वै पूषोदतिष्ठत् । सेयन्दिक् ॥ १५ ॥

अथारुणः केतुरुपरिष्टादुपादधात् । एवाहि देवा हति ।
ततो देवमनुष्याः पितरः । गन्धर्वाप्सरसश्चोदतिष्ठन्न् ।
सोर्ध्वा दिक् । या विप्रुषो विपरापतन्न् ।
ताभ्योऽसुरा रक्षाꣳसि पिशाचाश्चोदतिष्ठन्न् । तस्मात्ते पराभवन्न् ।
विप्रुड्भ्यो हि ते समभवन्न् । तदेषाभ्यनूक्ता ॥ १६ ॥

आपो ह यद्बृहतीर्गर्भमायन्न् । दक्षन्दधाना जनयन्तीस्स्वयंभुम् ।
तत इमेध्यसृज्यन्त सर्गाः । अद्भ्यो वा इदꣳ समभूत् ।
तस्मादिदꣳ सर्वं ब्रह्म स्वयंम्भ्विति ।
तस्मादिदꣳ सर्वꣳ शिथिलमिवाऽध्रुवमिवाभवत् ।
प्रजापतिर्वाव तत् । आत्मनात्मानं विधाय ।
तदेवानुप्राविशत् ।  तदेषाभ्यनूक्ता ॥ १७ ॥

विधाय लोकान् विधाय भूतानि । विधाय सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्य । आत्मनात्मानमभि संविवेशेति ।
सर्वमेवेदमाप्त्वा । सर्वमवरुद्ध्य ।

तदेवानुप्रविशति । य एवं वेद ॥ ९८ ॥

चतुष्टय्य आपो गृह्णाति । चत्वारि वा अपाꣳ रूपाणि ।
मेघो विद्युत् । स्तनयित्नुर्वृष्टिः । तान्येवावरुन्धे ।
आतपति वर्ष्या गृह्णाति । ताः पुरस्तादुपदधाति ।
एता वै ब्रह्मवर्चस्या आपः । मुखत एव ब्रह्मवर्चसमवरुन्धे ।
तस्मान्मुखतो ब्रह्मवर्चसितरः ॥ ९९ ॥

कूप्या गृह्णाति । ता दक्षिणत उपदधाति ।
एता वै तेजस्विनीरापः । तेज एऽवास्य दक्षिणतो दधाति ।
तस्माद्दक्षिणोऽर्धस्तेजस्वितरः । स्थावरा गृह्णाति ।
ताः पश्चादुपदधाति । प्रतिष्ठिता वै स्थावराः ।
पश्चादेव प्रतितिष्ठति । वहन्तीर्गृह्णाति ॥१०० ॥

ता उत्तरत उपदधाति ।
ओजसा वा एता वहन्तीरिवोद्गतीरिव आकूजतीरिव धावन्तीः ।
ओज एवास्योत्तरतो दधाति । तस्मादुत्तरोऽर्ध ओजस्वितरः ।
संभार्या गृह्णाति । ता मध्य उपदधाति ।
इयं वै संभार्याः । अस्यामेव प्रतितिष्ठति ।
पल्वल्या गृह्णाति । ता उपरिष्टादुपादधाति ॥ १०१ ॥

असौ वै पल्वयाः । अमुष्यामेव प्रतितिष्ठति ।
दिक्षूपदधाति । दिक्षु वा आपः ।
अन्नं वा आपः । अद्भ्यो चा अन्नञ्जायते ।
यदेवद्भ्योऽन्नञ्जायते । तदवरुन्धे ।
तं वा एतमरुणाः केतवो वातरशनाऋषयोऽचिन्वन् ।
तस्मादारुणकेतुकः ॥ १०२ ॥

तदेषाभ्यनूक्ता । केतवो अरुणासश्च ।
ऋषयो वातरशनाः । प्रतिष्ठाꣳ शतधाहि ।
समाहितासो सहस्रधायसमिति । शतशश्चैव सहस्रशश्च प्रतितिष्ठति ।
य एतमग्निञ्चिनुते य उचैनमेवं वेद ॥ १०३ ॥

जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयति ।
आपꣳ सर्वत्वाय । पुष्करपर्णꣳ रुक्मं पुरुषमित्युपदधाति ।
तपो वै पुष्करपर्णम् । सत्यꣳ रुक्मः । अमृतं पुरुषः ।
एतावद्वा वास्ति । यावदेतत् । यावदेवास्ति ॥ १०४ ॥

तदवरुन्धे । कूर्ममुपदधाति ।
अपामेव मेधमवरुन्धे । अथो स्वर्गस्य लोकस्य समष्ट्यै ।
आपमापामपस्सर्वाः । अस्मादस्मादितोऽमुतः ।
अग्निर्वायुश्च सूर्यश्च । सहसञ्चस्करर्द्धिया इति ।
वाय्वश्वा रश्मिपतयः । लोकं पृणच्छिद्रं पृण ॥ १०५ ॥

यास्तिस्रः परमजाः । इन्द्रघोषा वो वसुभिरेवाह्येवेति ।
पञ्चचितय उपदधाति । पाङ्क्तोऽग्निः ।
यावनेवाग्निः । तञ्चिनुते ।
लोकंपृणया द्वितीयामुपदधाति । पञ्च पदा वै विराट् ।
तस्या वा इयं पादः । अन्तरिक्षं पादः । द्यौः पादः ।
दिशः पादः । परोरजाः पादः । विराज्येव प्रतितिष्ठति ।
य एतमग्निञ्चिनुते । य उचैनमेवं वेद ॥ १०६ ॥

अग्निं प्रणीयोपसमाधाय । तमभित एता अबीष्टका उपदधाति ।
अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु ।
अथो आहुः । सर्वेषु यज्ञक्रतुष्विति ।
अथ हस्माहारुणस्स्वायंभुवः । सावित्रः सर्वोऽग्निरित्यननुषङ्गं मन्यामहे ।
नाना वा एतेषां वीर्याणि । कमग्निञ्चिनुते ॥ १०७ ॥

सत्रियमग्निञ्चिवानः । कमग्निञ्चिनुते ।
सावित्रमग्निञ्चिवानः । कमग्निञ्चिनुते ।
नाचिकेतमग्निञ्चिवानः । कमग्निञ्चिनुते ।
चातुर्होत्रियमग्निञ्चिवानः । कमग्निञ्चिनुते ।
वैश्वसृजमग्निञ्चिवानः । कमग्निञ्चिनुते ॥ १०८

उपानुवाक्यमाशुमग्निश्चिवानः । कमग्निश्चिनुते ।
इममारुणकेतुकमग्निश्चिवान इति । वृषा वा अग्निः ।
वृषाणौ सꣳस्फालयेत् । हन्येतास्य यज्ञः ।
तस्मान्नानुषज्यः । सोत्तरवेदिषु क्रतुषु चिन्वीत ।
उत्तरवेद्याꣳह्यग्निश्चीयते । प्रजाकामश्चिन्वीत ॥ १०९ ॥

प्राजापत्यो वा एषोऽग्निः । प्राजापत्याः प्रजाः ।
प्रजावान् भवति । य एवं वेद ।
पशुकामश्चिन्वीत । संज्ञानं वा एतत् पशूनाम् ।
यदापः पशूनामेव संज्ञानेऽग्निश्चिनुते ।
पशुमान् भवति । य एवं वेद ॥ ११० ॥

वृष्टिकामश्चिन्वीत । आपो वै वृष्टिः ।
पर्जन्यो वर्षुको भवति । य एवं वेद ।
आमयावी चिन्वीत । आपो वै भेषजम् ।
भेषजमेवास्मै करोति । सर्वमायुरेति ।
अभिचरꣳश्चिन्वीत । वज्रो वै आपः ॥ १११ ॥

वज्रमेव भ्रातृव्येभ्यः प्रहरति।स्तृणुत एनम् ।
तेजस्कामो यशस्कामः । ब्रह्मवर्चसकामस्स्वर्गकामश्चिन्वीत ।
एतावद्वा वास्ति । यावदेतत् ।
यावदेवास्ति । तदवरुन्धे ।
तस्यैतद् व्रतम् । वर्षति न धावेत् ॥ ११२ ॥

अमृतं वा आपः । अमृतस्यानन्तरित्यै ।
नाप्सु मूत्रपुरीषङ्कुर्यात् । न निष्ठीवेत् ।
न विवसनस्स्नायात् । गुह्यो वा एषोऽग्निः ।
एतस्याग्नेरनतिदाहाय । न पुष्करपर्णानि हिरण्यंवाऽधितिष्ठेत् ।
एतस्याग्नेरनभ्यारोहाय । न कूर्मस्याश्नीयात् ।
नोदकस्याघातुकान्येनमोदकानि भवन्ति । अघातुका आपः ।
य एतमग्निश्चिनुते । य उचैनमेवं वेद ॥ ११३ ॥

इमानुकं भुवना सीषधेम । इन्द्रश्च विश्वे च देवाः ।
यज्ञश्च नस्तन्वञ्च प्रजाश्च । आदित्यैरिन्द्रस्सह सीषधातु ।
आदित्यैरिन्द्रस्सगणो मरुद्भिः । अस्माकं भूत्वविता तनूनाम् ।
आप्लवस्व प्रप्लवस्व । आण्डीभवज मा मुहुः ।
सुखादीन्दुःखनिधनाम् । प्रतिमुञ्चस्व स्वां पुरम् ॥ ११४ ॥
मरीचयस्स्वायंभुवाः । ये शरीराण्यकल्पयन् ।
ते ते देहङ्कल्पयन्तु । मा च ते ख्यास्म तीरिषत् ।
उत्तिष्ठत मा स्वप्त । अग्निमिच्छध्वं भारताः ।
राज्ञस्सोमस्य तृप्तासः । सूर्येण सयुजोषसः ।
युवा सुवासाः । अष्टाचक्रा नवद्वारा ॥ ११५ ॥
देवानां पूरयोध्या । तस्याꣳहिरण्मयः कोशः ।
स्वर्गो लोको ज्योतिषाऽऽवृतः । यो वै तां ब्रह्मणो वेद ।
अमृतेनाऽऽवृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च ।
आयुः कीर्तिं प्रजान्ददुः । विभ्राजमानाꣳहरिणीम् ।
यशसा सम्परीवृताम् । पुरꣳहिरण्मयीं ब्रह्मा ॥ ११६ ॥
विवेशाऽपराजिता । पराङ्गेत्यज्यामयी ।
पराङ्गेत्यनाशकी । इहचामुत्रचान्वेति ।
विद्वान्देवासुरानुभयान् । यत्कुमारी मन्द्रयते ।
यद्योषद्यत्पतिव्रता । अरिष्टं यत्किंच क्रियते ।
अग्निस्तदनुवेधति । अशृतासश्शृतासश्च ॥ ११७ ॥
यज्वानो येऽप्ययज्वनः । स्वर्यन्तो नापेक्षन्ते ।
इन्द्रमग्निश्च ये विदुः । सिकता इव संयन्ति ।
रश्मिभिस्समुदीरिताः । अस्माल्लोकादमुष्माच्च ।
ऋषिभिरदात्पृश्निभिः ।
अपेत वीत वि च सर्पतातः येऽत्रस्थ पुराणा ये च नूतनाः ।
अहोभिरद्भिरक्तुभिर्व्यक्तम् ॥ ११८ ॥

यमो ददात्ववसानमस्मै । नृ मुणन्तु नृपात्वर्यः ।
अकृष्टा ये च कृष्टजाः । कुमारीषु कनीनीषु ।
जारिणीषु च ये हिताः । रेतःपीता आण्डपीताः ।
अङ्गारेषु च ये हुताः । उभयान् पुत्रपौत्रकान् ।
युवेऽहं यमराजगान् । शतमिन्नु शरदः ॥ ११९ ॥

अदो यद्ब्रह्म विलबम् । पितृणाञ्च यमस्य च ।
वरुणस्याश्विनोरग्नेः । मरुताञ्च विहायसाम् ।
कामप्रयवणं मे अस्तु । स ह्येवास्मि सनातनः ।
इति नाको ब्रह्मिश्रवो रायो धनम् । पुत्रानापो देवीरिहाऽऽहित ॥ १२० ॥

विशीर्ष्णीङ्गृध्रशीर्ष्णीश्च । अपेतोनिर्ऋतिँ हथः ।
परिबाधँ श्वेतकुक्षम् । निजङ्घँ शबलोदरम् ।
स तान् वाच्यायया सह । अग्ने नाशय सन्दृशः ।
ईर्ष्यासूये बुभुक्षाम् । मन्युं कृत्यां च दीधिरे ।
रथेन किँशुकावता । अग्ने नाशय सन्दृशः ॥ १२१ ॥

पर्जन्याय प्रगायत । दिवस्पुत्राय मीढुषे ।
स नो यवसमिच्छतु।इदं वचः पर्जन्याय स्वराजे ।
हृदो अस्त्वन्तरन्तद्युयोत । मयोभूर्वातो विश्वकृष्टयस्सन्त्वस्मे ।
सुपिप्पला ओषधीर्देवगोपाः । यो गर्भमोषधीनम् ।
गवाङ्कृणोत्यर्वताम् । पर्जन्यः पुरूषीणाम् ॥ १२२ ॥

पुनर्मामैत्विन्द्रियम् । पुनरायुः पुनर्भगः ।
पुनर्ब्राह्मणमैतु मा । पुनर्द्रविणमैतु मा ।
यन्मेऽद्य रेतः पृथिवीमस्कान् । यदोषधीरप्यसरद्यदापः ।
इदन्तत्पुनराददे । दीर्घायुत्वाय वर्चसे ।
यन्मे रेतः प्रसिच्यते । यन्म आजायते पुनः ।
तेन माममृतं कुरु । तेन सुप्रजसङ्कुरु ॥ १२३ ॥

अद्भ्यस्तिरोधाऽजायत । तव वैश्रवणस्सदा ।
तिरोधेहि सपत्नान्नः । ये अपोऽश्नन्ति केचन ।

त्वाष्ट्रीं मायां वैश्रवणः । रथँ सहस्रवन्धुरम् ।
पुरुश्चक्रँ सहस्राश्वम् । आस्थायायाहि नो बलिम् ।
यस्मै भूतानि बलिमावहन्ति । धनङ्गावो हस्तिहिरण्यमश्वान् ॥ १२४ ॥

असाम सुमतौ यज्ञियस्य । श्रियं बिभ्रतिऽन्नमुखीं विराजम् ।
सुदर्शने च क्रोञ्चे च । मैनागे च महागिरौ ।
शतद्वाट्टारगमन्ता । सँहार्यन्नगरं तव ।
इति मन्त्राः । कल्पोऽत ऊर्ध्वम् । यदि बलिँ हरेत् ।
हिरण्यनाभये वितुदये कौबेरायायं बलिः ॥ १२५ ॥

सर्वभूतधिपतये नम इति । अथ बलिँ हृत्वोपतिष्ठेत ।
क्षत्रं क्षत्रं वैश्रवणः । ब्राह्मणा वयँ स्मः ।
नमस्ते अस्तु मा मा हिँसीः । अस्मात्प्रविश्यान्नमद्धीति ।
अथ तमग्निमादधीत । यस्मिन्नेतत्कर्म प्रयुञ्जीत ।
तिरोधा भूः । तिरोधा भुवः ॥ १२६ ॥

तिरोधास्स्वः । तिरोधा भूर्भुवस्स्वः ।
सर्वेषां लोकानामाधिपत्ये सीदेति । अथ तमग्निमिन्धीत ।
यस्मिन्नेतत्कर्म प्रयुञ्जीत । तिरोधा भूस्स्वाहा ।
तिरोधा भुवस्स्वाहा । तिरोधास्स्वस्स्वाहा ।
तिरोधा भूर्भुवस्स्वस्स्वाहा ।
यमिन्नस्य काले सर्वा आहुतीर् हुता भवेयुः ॥ १२७ ॥

अपि ब्राह्मणमुखीनाः । तस्मिन्नह्नः काले प्रयुञ्जीत ।
परस्सुप्तजनाद्वेपि । मास्म प्रमाद्यन्तमाध्यापयेत् ।
सर्वार्थास्सिद्ध्यन्ते । य एवं वेद ।
क्षुध्यन्निदमजानताम् । सर्वार्था न सिद्ध्यन्ते ।
यस्ते विघातुको भ्राता । ममान्तर्हृदये श्रितः ॥ १२८ ॥

तस्मा इममग्रपिण्डञ्जुहोमि । स मेऽर्थान्मा विवधीत् ।
मयि स्वाहा । राजाधिराजाय प्रसह्यसाहिने ।
नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् ।

कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय ।
महाराजाय नमः । केतवो अरुणासश्च ।
ऋषयो वातरशनाः । प्रतिष्ठाँ शतधा हि ।
समाहितासो सहस्रधायसम् । शिवानश्शन्तमा भवन्तु ।
दिव्या आप ओषधयः । सुमृडीका सरस्वति ।
मा ते व्योम सन्दृशि ॥ १२९ ॥

संवत्सरमेतद् व्रतं चरेत् । द्वौ वा मासौ ।
नियमस्समासेन । तस्मिन्नियमविशेषाः ।
त्रिषवणमुदकोपस्पर्शी । चतुर्थकालपानभक्तस्स्यात् ।
अहरहर्वा भैक्षमश्नीयात् । औदुंबरीभिस्समिद्भिरग्निं परिचरेत् ।
पुनर्मामैत्विन्द्रियनित्येतेनाऽनुवाकेन । उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वीत ॥ १३० ॥

असञ्चयवान् । अग्नये वायवे सूर्याय ।
ब्रह्मणे प्रजापतये । चन्द्रमसे नक्षत्रेभ्यः ।
ऋतुभ्यस्संवत्सराय । वरुणायारुणायेति व्रतहोमाः ।
प्रवर्ग्यवदादेशः । अरुणाः काण्डऋषयः ।
अरण्येऽधीयीरन् । भद्रङ्कर्णेभिरिति द्वे जपित्वा ॥ १३१ ॥

महानाम्नीभिरुदकँ सँस्पर्श्य । तमाचार्यो दद्यात् ।
शिवानश्शन्तमेत्योषधीरालभते । सुमृडीकेति भूमिम् ।
एवमपवर्गे । धेनुर्दक्षिणा । कँसं वासश्च क्षौमम् ।
अन्यद्वा शुक्लम् । यथाशक्ति वा । एवँ स्वाध्यायधर्मेण ।
अरण्येऽधीयीत । तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति ॥ १३२ ॥

ॐ भद्रङ्कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ १३३ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

This first prashna of the arAnyaka is known as aruNaprashnaH

From taittirIyasamhitAtml
Note on the use of t or th in apashyamahametAnthsapta in
.. 0. 1. 7. 21.. . See top right
https://archive.org/details/taittiriya/taittiriya$_aranyaka_bhaskara_01/page/n50/mode/1up$
It is explained in Taittiriya-pratisakhya
https://archive.org/details/in.ernet.dli.2015.553666/page/n161/mode/2up
See pages 88 and 89 .
There are two parts

Rule 1 (a and b)
a .
if ङ् followed by स् , ष् then क् is Agama
eg - प्रत्यङ् सोमो => प्रत्यङ्+क्+सोमो
eg - प्रत्यङ् षडहो => प्रत्यङ् +क् +षडहो

b .
if ट् , न् followed by स् , ष् ) then त् is Agama
eg - विद्वान् सोमेन => विद्वान् + त् +सोमेन
our eg एतान् सप्त => एतान् + त् +सप्त
वट् स्वयमभि => वट् + त् + स्वयमभि

Rule 2
First letter in group followed by ऊष्म - becomes second in the respective group
eg - प्रत्यङ्+क्+सोमो => प्रत्यङ्+ ख् +सोमो
विद्वान् + त् +सोमेन => विद्वान् + थ् +सोमेन
our eg एतान् + त् +सप्त => एतान् + थ् +सप्त

See pratishakhya reference page 164
This is the reason many books also use saMvathsara
in place of saMvatsara etc .

BTW वर्धन as वर्द्धन is also documented as द्विवर्णम्
page 162 onwards in the same pratishAkhya reference
(sutra 1 and 5 for वर्द्धन)

These specifics are emphasized in some vedic books to remind
उच्चारण although some books are liberal and expect
students to learn from parampara .

- Muralidhara muraliba at gmail.com

Encoded with Accents by Rajagopal Iyer

॥ तैत्तिरीयारण्यकम् अरुणप्रश्नः ॥

स्वररहितम्
ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः ॥ १ ॥

अग्निर्वायुश्च सूर्यश्च । सह संचस्करर्द्धिया ।
वाय्वश्वा रश्मिपतयः । मरीच्यात्मनो अद्रुहः ।
देवीर्भुवनसूवरीः । पुत्रवत्वाय मे सुत ।
महानाम्नीर्महामानाः । महसो महसस्स्वः ।
देवीः पर्जन्यसूवरीः । पुत्रवत्वाय मे सुत ॥ २ ॥

अपाश्न्युष्णिमपा रक्षः । अपाश्न्युष्णिमपारघम् ।
अपाघ्रामप चावर्तिम् । अपदेवीरितो हित ।
वज्रं देवीरजीताꣳश्च । भुवनं देवसूवरीः ।
आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत ।
शिवानश्शन्तमा भवन्तु । दिव्या आप ओषधयः ।
सुमृडीका सरस्वती । मा ते व्योम संदृशि ॥ ३ ॥

स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् ।
एतैरादित्यमण्डलम् । सर्वैरेव विधास्यते ।
सूर्यो मरीचिमादत्ते । सर्वस्माद्भुवनादधि ।
तस्याः पाकविशेषेण । स्मृतं कालविशेषणम् ।
नदीव प्रभवात्काचित् । अक्षय्यात्स्यन्दते यथा ॥ ४ ॥

तान्नद्योऽभिसमायन्ति । सोरुस्सती न निवर्तते एवन्नानासमुत्थानाः ।
कालास्संवत्सरꣳ श्रिताः । अणुशश्च महशश्च ।
सर्वे समवयन्त्रितम् । सतैस्सर्वैस्समाविष्टः ।
ऊरुस्सन्न निवर्तते अधिसंवत्सरं विद्यात् । तदेव लक्षणे ॥ ५ ॥

अणुभिश्च महद्भिश्च । समारूढः प्रदृश्यते ।
संवत्सरः प्रत्यक्षेण । नाधिसत्वः प्रदृश्यते ।
पटरो विक्लिधः पिङ्गः । एतद्वरुणलक्षणम् ।
यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते ।
एकꣳहि शिरो नाना मुखे । कृत्स्नम् तदृतुलक्षणम् ॥ ६ ॥

उभयतस्सप्तेन्द्रियाणि । जल्पितं त्वेव दिह्यते ।
शुक्लकृष्णे संवत्सरस्य । दक्षिणवामयोः पार्श्वयोः ।
तस्यैषा भवति । शुक्रं ते अन्यद्यजतं ते अन्यत् ।
विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावः ।
भद्रा ते पूषन्निह रातिरस्त्विवति । नात्र भुवनम् । न पूषा ।
न पशवः । नादित्यस्संवत्सर एव प्रयक्षेण प्रियतमं विद्यात् ।
एतद्वै संवत्सरस्य प्रियतमꣳ रूपम् । योऽस्य महानर्थ उत्पत्स्यमानो भवति ।
इदं पुण्यं कुरुष्वेति । तमाहरणं दद्यात् ॥ ७ ॥

साकंजानाꣳ सप्तथमाहुरेकजम् । षडुद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः । स्थात्रे रेजन्ते विकृतानि रूपशः
को नु मर्या अमिथितः । सखा सखायमब्रवीत् ।
जहाको अस्म दीषते । यस्तित्याज सखिविदꣳ सखायाम् ।
न तस्य वाच्यपि भागो अस्ति । यदीꣳ शृणोत्यलकꣳ शृणोति ॥ ८ ॥

न हि प्रवेद सुकृतस्य पन्थामिति । ऋतुर्ऋतुना नुद्यमानः ।
विननादाभिधावः । षष्टिश्च त्रिꣳशका वल्गाः ।
शुककृष्णौ च षष्टिकौ । सारागवस्त्रैर्जरदक्षः ।

वसन्तो वसुभिस्सह संवत्सरस्य सवितुः ।
प्रैषकृत्प्रथमः स्मृतः । अमूनादयतीत्यन्यान् ॥ ९ ॥

अमूँश्च परिरक्षतः । एता वाचः प्रयुज्यन्ते ।
यत्रैतदुपदृश्यते । एतदेव विजानीयात् ।
प्रमाणं कालपर्यये । विशेषणं तु वक्ष्यामः ।
ऋतूनां तन्निबोधत । शुक्लवासा रुद्रगणः ।
ग्रीष्मेणाऽऽवर्तते सह । निजहन् पृथिवीँ सर्वाम् ॥ १० ॥

ज्योतिषाऽप्रतिख्येन सः । विश्वरूपणि वासाँसि ।
आदित्यानां निबोधत । संवत्सरीणं कर्मफलम् ।
वर्षाभिर्ददताँ सह । अदुःखो दुःखचक्षुरिव ।
तद्माऽऽपीत इव दृश्यते । शीतेनाव्यथयन्निव ।
रुरुदक्ष इव दृश्यते । ह्लादयते ज्वलतश्चैव ।
शाम्यतश्चास्य चक्षुषी । या वै प्रजा भ्रँश्यन्ते ।
संवत्सराता भ्रँश्यन्ते । याः प्रतितिष्ठन्ति ।
संवत्सरे ताः प्रतितिष्ठन्ति । वर्षाभ्य इत्यर्थः ॥ ११ ॥

अक्षिदुःखोत्थितस्यैव । विप्रसन्ने कनीनिके ।
आङ्क्ते चाद्गणं नास्ति । ऋभूणां तन्निबोधत ।
कनकाभानि वासाँसि । अहतानि निबोधत ।
अन्नमश्नीत मृज्मीत । अहं वो जीवनप्रदः ।
एता वाचः प्रयुज्यन्ते । शरद्यत्रोपदृश्यते ॥ १२ ॥

अभिधून्वन्तोऽभिघ्नन्त इव । वातवन्तो मरुद्गणाः ।
अमुतो जेतुमिषुमुखामिव । सन्नद्धास्सह ददृशे ह ।
अपध्वस्तैर्वस्तिवर्णैरिव । विशिखासः कपर्दिनः ।
अक्रुद्धस्य योत्स्यमानस्य । क्रुद्धस्येव लोहिनी ।
हेमतश्चक्षुषी विद्यात् । अक्ष्णयोः क्षिपणोरिव ॥ १३ ॥

दुर्भिक्षं देवलोकेषु । मनूनामुदकं गृहे ।
एता वाचः प्रवदन्तीः । वैद्युतो यान्ति शैशिरीः ।
ता अग्निः पवमना अन्वैक्षत । इह जीविकामपरिपश्यन् ।
तस्यैषा भवति । इहेहवस्स्वतपसः ।
मरुतस्सूर्यत्वचः । शर्म सप्रथा आवृणे ॥ १४ ॥

अतिताम्राणि वासाँसि । अष्टिवज्रिशतघ्नि च ।
विश्वे देवा विप्रहरन्ति । अग्निजिह्वा असश्चत ।
नैव देवो न मर्त्यः । न राजा वरुणो विभुः ।
नाग्निर्नेन्द्रो न पवमानः । मातृक्कच्चन विद्यते ।
दिव्यस्यैका धनुरार्त्निः । पृथिव्यामपरा श्रिता ॥ १५ ॥

तस्येन्द्रो वम्रिरूपेण । धनुर्ज्यामछिनथ्स्वयम् ।
तदिन्द्रधनुरित्यज्यम् । अभ्रवर्णेषु चक्षते ।
एतदेव शंयोर्बार्हस्पत्यस्य । एतद्रुद्रस्य धनुः ।
रुद्रस्य त्वेव धनुरार्त्निः । शिर उत्पिपेष ।
स प्रवर्ग्योऽभवत् । तस्माद्यस्सप्रवर्ग्येण यज्ञेन यजते ।
रुद्रस्य स शिरः प्रतिदधाति । नैनँ रुद्र आरुको भवति । य एवं वेद ॥ १६ ॥

अत्यूर्ध्वाक्षोऽतिरश्चात् । शिशिरः प्रदृश्यते ।
नैव रूपं न वासाँसि । न चक्षुः प्रतिदृश्यते ।
अन्योन्यं तु न हिँस्रातः । सतस्तद्देवलक्षणम् ।
लोहितोऽक्ष्णि शारशीर्ष्णिः । सूर्यस्योदयनं प्रति ।
त्वं करेषिन्यञ्जलिकाम् । त्वं करोषि निजानुकाम् ॥ १७ ॥

निजानुकामेन्यञ्जलिका । अमी वाचमुपासतामिति ।
तस्मै सर्व ऋतवो नमन्ते । मर्यादाकरत्वात्प्रपुरोधाम् ।
ब्राह्मण आप्नोति । य एवं वेद । स खलु संवत्सर एतैस्सेनानीभिस्सह ।
इन्द्राय सर्वान्कामानभिवहति । स द्रप्सः । तस्यैषा भवति ॥ १८ ॥

अवद्रप्सो अँशुमतीमतिष्ठत् । इयानः कृष्णो दशभिस्सहस्रैः ।
आवर्तमिन्द्रः शच्या धमन्तम् । उप्स्नुहि तं नृमणामथद्रामिती ।
एतयैवेन्द्रः सलावृक्या सह । असुरान् परिवृश्चति ।
पृथिव्यँशुमती । तामन्ववस्थितः संवत्सरो दिवं च ।
नैवं विदुषाऽऽचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम् । यो द्रुह्यति ।
भ्रश्यते स्वर्गाल्लोकात् । इत्यृतुमण्डलानि ।
सूर्यमण्डलान्याख्यायिकाः । अत ऊर्ध्वँ सनिर्वचनाः ॥१९ ॥

आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिषिमान् विभासः ।
ते अस्मै सर्वे दिवमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति ।
कश्यपोऽष्टमः । स महामेरुं न जहाति ।

तस्यैषा भवति । यत्ते शिल्पंकश्यप रोचनावत् ।
इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्त्सूर्या अर्पितास्सप्त साकम् ॥ २० ॥

तस्मिन् राजानमधिविश्रयेममिति । ते अस्मै सर्वे कश्यपाज्ज्य् ओतिर्लभन्ते ।
तान्त्सोमः कश्यपादधिनिर्द्धमति । भ्रस्ताकर्मकृदिवैवम् ।
प्राणो जीवानीन्द्रियजीवानि । सप्त शीर्षण्याः प्राणाः ।
सूर्या इत्याचार्याः । अपश्यमहमेतान्त्सप्त सूर्यानिति ।
पञ्चकर्णो वात्स्यायनः । सप्तकर्णश्च प्लाक्षिः ॥ २१ ॥

See a note in the end on adding t before sapta for apashyamahametAntsapta
आनुश्राविक एव नौ कश्यप इति । उभौ वेदयिते ।
न हि शेकुमिव महामेरुं गन्तुम् । अपश्यमहमेत्सूर्यमण्डलं परिवर्तमानम् ।
गार्ग्यः प्राणत्रातः । गच्छन्त महामेरुम् । एकं चाजहतम् ।
भ्राजपटरपतङ्गा निहने । तिष्ठन्नातपन्ति । तस्मादिह तप्तितपाः ॥ २२ ॥

अमुत्रेतरे । तस्मादिहातप्तितपाः । तेषामेषा भवति ।
सप्त सूर्या दिवमनुप्रविष्टाः । तानन्वेति पथिभिर्दक्षिणावान् ।
ते अस्मै सर्वे घृतमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति ।
सप्तर्त्विजस्सूर्या इत्याचार्याः । तेषामेषा भवति । सप्त दिशो नानासूर्याः ॥ २३ ॥

सप्त होतार ऋत्विजः । देवा आदित्या ये सप्त ।
तेभिस्सोमाभीरक्षण इति । तदप्याम्नायः ।
दिग्भ्राज ऋतून् करोति । एतयैवावृता सहस्रसूर्यताया इति वैशंपायनः ।
तस्यैषा भवति । यद्द्याव इन्द्र ते शतँशतं भूमीः ।
उतस्युः । नत्वा वज्रिन् सहस्रँ सूर्याः ॥ २४ ॥

अनुनजातमष्ट रोदसी इति । नानालिङ्गत्वादृतूनां नानासूर्यत्वम् ।
अष्टौ तु व्यवसिता इति । सूर्यमण्डलान्यष्टात ऊर्ध्वम् ।
तेषामेषा भवति । चित्रं देवानामुदगादनीकम् ।
चक्षुर्मित्रस्य वरुणस्याग्ने । आप्रा द्यावापृथिवी अन्तरिक्षम् ।
सूर्य आत्मा जगतस्तस्थुषश्चेति ॥२५ ॥

क्वेदमभ्रन्निविशते । क्वायँ संवत्सरो मिथः ।
क्वाहः क्वेयन्देव रात्री । क्व मासा ऋतवः श्रिताः ।
अर्द्धमासा मुहूर्ताः । निमेषास्तुटिभिस्सह ।
क्वेमा आपो निविशन्ते । यदीतो यान्ति सम्प्रति ।

काला अप्सुनिविशन्ते । आपस्सूर्ये समाहिताः ॥ २६ ॥

अभ्राण्यपः प्रपद्यन्ते । विद्युत्सूर्ये समाहिता ।
अनवर्णे इमे भूमी । इयं चाऽसौ च रोदसि ।
कि ँ स्विदत्रान्तरा भूतम् । येनेमे विधृते उभे ।
विष्णुना विधृते भूमी । इति वत्सस्य वेदना ।
इरावती धेनुमती हि भूतम् । सूयवसिनी मनुषे दशस्ये ॥ २७ ॥

व्यष्टभ्नाद्रोदसी विष्णवेते । दाधर्थ पृथिवीमभितो मयूखैः ।
किन्तद्विष्णोर्बलमाहुः । का दीप्तिः किं परायणम् ।
एको यद्धारयद्देवः । रेजती रोदसी उभे ।
वाताद्विष्णोर्बलमाहुः । अक्षराद्दीप्तिरुच्यते ।
त्रिपदाद्धारयद्देवः । यद्विष्णोरेकमुत्तमम् ॥ २८ ॥

अग्नयो वायवश्चैव । एतदस्य परायणम् ।
पृच्छामि त्वा परं मृत्युम् । अवमं मध्यमश्चतुम् ।
लोकञ्च पुण्यपापानाम् । एतत्पृच्छामि सम्प्रति ।
अमुमाहुः परं मृत्युम् । पवमानं तु मध्यमम् ।
अग्निरेवावमो मृत्युः । चन्द्रमाश्चतुरुच्यते ॥ २९ ॥

अनाभोगाः परं मृत्युम् । पापास्संयन्ति सर्वदा ।
आभोगास्त्वेव संयन्ति । यत्र पुण्यकृतो जनाः ।
ततो मध्यममायन्ति । चतुमग्निं च सम्प्रति ।
पृच्छामि त्वा पापकृतः । यत्र यातयते यमः ।
त्वन्नस्तद्ब्रह्मन् प्रब्रूहि । यदि वेत्थाऽसतो गृहन् ॥ ३० ॥

कश्यपादुदितास्सूर्याः । पापान्निर्घ्नन्ति सर्वदा ।
रोदस्योन्तर्देशेषु । तत्र न्यस्यन्ते वासवैः ।
तेऽशरीराः प्रपद्यन्ते । यथाऽपुण्यस्य कर्मणः ।
अपाण्यपादकेशासः । तत्र तेयोनिजा जनाः ।
मृत्वा पुनर्मृत्युमापद्यन्ते । अद्यमानास्स्वकर्मभिः ॥ ३१ ॥

आशातिकाः क्रिमय इव । ततः पूयन्ते वासवैः अपैतं मृत्युं जयति ।
य एवं वेद । स खल्वैवं विद्ब्राह्मणः । दीर्घश्रुत्तमो भवति ।
कश्यपस्यातिथिस्सिद्धगमनस्सिद्धगमनः । तस्यैषा भवति ।
आयस्मिन्थ्सप्त वासवाः । रोहन्ति पूर्व्या रुहः ॥ ३२ ॥

ऋषिर् ह दीर्घश्रुत्तमः । इन्द्रस्य घर्मो अतिथिरिति ।
कश्यपः पश्यको भवति । यत्सर्वं परिपश्यतीति सौक्ष्म्यात् ।
अथाग्नेरष्टपुरुषस्य । तस्यैषा भवति ।
अग्ने नय सुपथा राये अस्मान् । विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठन्ते नम उक्तिं विधेमेति ॥ ३३ ॥

अग्निश्च जातवेदाश्च । सहोजा अजिराप्रभुः । वैश्वानरो नर्यापाश्च ।
पङ्क्तिराधाश्च सप्तमः विसर्पेवाऽष्टमोऽग्नीनाम् ।
एतेऽष्टौ वसवः क्षिता इति । यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः ।
नीलार्चिश्च पीतकार्चिश्चेति । अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य ।
प्रभ्राजमाना व्यवदाताः ॥ ३४ ॥

याश्च वासुकिवैद्युताः । रजताः परुषाः श्यामाः । कपिला अतिलोहिताः ।
ऊर्ध्वा अवपतन्ताश्च । वैद्युत इत्येकादश । नैनं वैद्युतो हिनस्ति ।
य एवं वेद । स होवाच व्यासः पाराशर्यः ।
विद्युद्वधमेवाहं मृत्युमैच्छमिति । न त्वकामꣳ हन्ति ॥ ३५ ॥

य एवं वेद । अथ गन्धर्वगणाः । स्वानभ्राट् ।
अङ्घारिर्बम्भारिः । हस्तस्सुहस्तः । कृशानुर्विश्वावसुः ।
मूर्धन्वान्थ्सूर्यवर्चाः । कृतिरित्येकादश गन्धर्वगणाः ।
देवाश्च महादेवाः । रश्मयश्च देवा गरगिरः ॥३६ ॥

नैनं गिरो हिनस्ति । य एवं वेद ।
गौरी मिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी । सस्राक्षरा परमे व्योमन्निति ।
वाचो विशेषणम् । अथ निगदव्याख्याताः ।
ताननुक्रमिष्यामः । वराहवस्स्वतपसः ॥ ३७ ॥

विद्युन्महसो धूपयः । श्वापयो गृहमेधाश्चेत्येते ।
ये चेमेऽशिमिविद्विषः । पर्जन्यास्सप्त पृथिवीमभिवर्षन्ति ।
वृष्टिभिरिति । एतयैव विभक्तिविपरीताः । सप्तभिर्वा तैरुदीरिताः ।
अमून्लोकानभिवर्षन्ति । तेशामेषा भवति । समानमेतदुदकम् ॥ ३८ ॥

उच्चैत्यवचाहभिः । भूमिं पर्जन्या जिन्वन्ति । दिवं जिन्वन्त्यग्नय इति ।
यदक्षरं भूतकृतम् । विश्वे देवा उपासते । महर्षिमस्य गोप्तारम् ।

जमदग्निमकुर्वत । जमदग्निराप्यायते ।
छन्दोभिश्चतुरुत्तरैः । राज्ञस्सोमस्य तृप्तासः ॥ ३९ ॥

ब्रह्मणा वीर्यावता । शिवा नः प्रदिशो दिशः ।
तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये ।
दैवीस्स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् ।
शन्नो अस्तु द्विपदे । शं चतुष्पदे ।
सोमपा ( ३ ) असोमपा ( ३ ) इति निगदव्याख्याताः ॥ ४० ॥

सहस्रवृदियं भूमिः । परं व्योम सहस्रवृत् । अश्विना भुज्यूनासत्या ।
विश्वस्य जगतस्पती । जाया भूमिः पतिर्व्योम । मिथुनन्ता अतुर्यथुः ।
पुत्रो बृहस्पती रुद्रः । सरमा इति स्त्रीपुमम् ।
शुक्र,न् वामन्यद्यजं वामन्यत् । विषुरूपे अहनी द्यौरिव स्थः ॥ ४१ ॥

विश्वा हि माया अवथः स्वधावन्तौ ।
भद्रा वां पूषणाविहरातिरस्तु वासात्यौ चित्रौ जगतो निधानौ ।
द्यावाभूमी चरथः सँ सखायौ । तावश्विना रासभाश्वा हवं मे ।
शुभस्पती आगतँ सूर्यया सह । त्युग्रोह भुज्युमश्विनोदमेघे ।
रयिन्न कश्चिन्ममृवां ( २ ) अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिः ।
अन्तरिक्षप्रुड्भिरपोदकाभिः ॥ ४२
तिस्रः क्षपस्त्रिरहातिव्रजद्भिः । नासत्या भुज्युमूहथुः पतङ्गैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे । त्रिभीरथैश्शतपद्भिः षडश्वैः ।
सवितारं वितन्वन्तम् । अनुबध्नाति शांबरः । आपपूर्षंबरश्चैव ।
सवितारेपसोऽभवत् । त्यँ सुतृप्तं विदित्वैव । बहुसोम गिरं वशी ॥ ४३ ॥

अन्वेति तुग्रो वक्रियान्तम् । आयसूयान्त्सोमतृप्सुषु । स सङ्ग्रामस्तमोद्योऽत्योतः ।
वाचो गाः पिपाति तत् । स तद्गोभिस्स्ताऽत्येत्यन्ये । रक्षसानन्विताश्च ये ।
अन्वेति परिवृत्याऽस्तः । एवमेतौस्थो अश्विना ।
ते एते द्युःपृथिव्योः । अहरहर्गर्भन्दधाथे ॥ ४४ ॥

तयोरेतौ वत्सावहोरात्रे । पृथिव्या अहः । दिवो रात्रिः ।
ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वत्सौ ।
अग्निश्चादित्यश्च । रात्रेर्वत्सः । श्वेत आदित्यः । अहोऽग्निः ॥ ४५ ॥

ताम्रो अरुणः । ता अविसृष्टौ । दम्पती एव भवतः ।
तयोरेतौ वत्सौ । वृत्रश्च वैद्युतश्च । अग्नेर्वृत्रः । वैद्युत आदित्यस्य ।

ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वत्सौ ॥ ४६ ॥

उष्मा च नीहारश्च । वृत्रस्योष्मा । वैद्युतस्य नीहारः ।
तौ तावेव प्रतिपद्येते । सेयँ रात्री गर्भिणी पुत्रेण संवसति ।
तस्या वा एतदुल्बणम् । यद्रात्रौ रश्मयः ।
यथा गोर्गर्भिण्या उल्बणम् । एवमेतस्या उल्बणम् ।
प्रजयिष्णुः प्रजया च पशुभिश्च भवति ।
य एवं वेद । एतमुद्यन्तमपियन्तं चेति ।
आदित्यः पुण्यस्य वत्सः । अथ पवित्राङ्गिरसः ॥ ४७ ॥

पवित्रवन्तः परिवाजमासते । पितैषां प्रत्नो अभिरक्षति व्रतम् ।
महस्समुद्रं वरुणस्तिरोदधे । धीरा इच्छेकुर्धरुणेष्वारभम् ।
पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषिविश्वतः ।
अतप्ततनूर्न तदामो अश्नुते । शृतास इद्वहन्तस्तत्समाशत ।
ब्रह्मा देवानाम् । असतस्सद्ये ततक्षुः ॥ ४८ ॥

ऋशयस्सप्तात्रिश्च यत् । सर्वेऽत्रयो अगस्त्यश्च ।
नक्षत्रैश्शङ्कृतोऽवसन् । अथ सवितुः श्यावाश्वस्याऽवर्तिकामस्य ।
अमी य ऋक्षा निहितास उच्चा । नक्तं ददृश्रे कुहाचिद्दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि । विचाकशच्चन्द्रमा नक्षत्रमेति ।
तत्सवितुर्वरेण्यं । भर्गो देवस्य धीमहि ॥ ४९ ॥

धियो यो नः प्रचोदयात् । तत्सवितुर्वृणीमहे ।
वयन्देवस्य भोजनम् । श्रेष्ठँ सर्वधातमम् ।
तुरं भगस्य धीमहि । अपागूहत सविता तृभीन् ।
सर्वादिवो अन्धसः । नक्तन्तान्यभवन्दृशे ।
अस्थ्यस्थ्ना संभविष्यामः । नाम नामैव नाम मे ॥ ५० ॥

नपुँसकं पुमाँस्त्र्यस्मि । स्थावरोऽस्म्यथ जङ्गमः ।
यजेऽयक्षि यष्टाहे च । मया भूतान्ययक्षत ।
पशवो मम भूतानि । अनूबन्ध्योऽस्म्यहं विभुः ।
स्त्रियस्सतीः । ता उमे पुँस आहुः ।
पश्यदक्षण्वान्नविचेतदन्धः । कविर्यः पुत्रस्य इमा चिकेत ॥ ५१ ॥

यस्ता विजानाथ्सवितुः पितासत् । अन्धो मणिमविन्दत् ।
तमनङ्गुलिरावयत् । अग्रीवः प्रत्यमुञ्चत् ।

तमजिह्वा असश्चत । ऊर्ध्वमूलमवाक्छाखम् ।
वृक्षं यो वेद सम्प्रति । न स जातु जनः श्रद्दध्यात् ।
मृत्युर्मा मारयादितिः । हसितꣳ रुदितङ्गीतम् ॥ ५२ ॥

वीणापणवलासितम् । मृतञ्जीवं च यत्किंचित्
अङ्गानि स्नेव विद्धि तत् । अतृष्यꣳ स्तृष्यध्यायत् ।
अस्माज्जाता मे मिथू चरन्न् । पुत्रो निर्ऋत्या वैदेहः ।
अचेता यश्च चेतनः । स तं मणिमविन्दत् ।
सोऽनङ्गुलिरावयत् । सोऽग्रीवः प्रत्यमुश्चत् ॥ ५३ ॥

सोऽजिह्वो असश्चत । नैतमृशिं विदित्वा नगरं प्रविशेत् ।
यदि प्रविशेत् । मिथौ चरित्वा प्रविशेत् ।
तथ्सम्भवस्यं व्रतम् । आतमग्ने रथन्तिष्ठ ।
एकाश्वमेकयोजनम् । एकचक्रमेकधुरम् ।
वातध्राजिगतिं विभो । न रिष्यति न व्यथते ॥ ५४ ॥

नास्याक्षो यातु सज्जति । यच्छ्वेतान्रोहिताꣳ श्चाग्नेः ।
रथे युक्त्वाऽधितिष्ठति । एकया च दशभिश्च स्वभूते ।
द्वाभ्यामिष्टये विꣳशत्या च । तिसृभिश्च वहसे त्रिꣳशता च ।
नियुद्भिर्वायविहिता विमुश्च ॥ ५५ ॥

आतनुष्व प्रतनुष्व । उद्धमाऽऽधम सन्धम ।
आदित्ये चन्द्रवर्णानाम् । गर्भमाधेहि यः पुमान् ।
इतस्सिक्तꣳ सूर्यगतम् । चन्द्रमसे रसङ्कृधि ।
वारादञ्जनयाग्रेऽग्निम् । य एको रुद्र उच्यते ।
असङ्ख्यातास्सहस्राणि । स्मर्यते न च दृश्यते ॥ ५६ ॥

एवमेतन्निबोधत । आमन्द्रैरिन्द्र हरिभिः ।
याहि मयूररोमभिः । मा त्वा केचिन्नियेमुरिन्न पाशिनः ।
दधन्वेव ता इहि । मा मन्द्रैरिन्द्र हरिभिः ।
यामि मयूररोमभिः । मा मा केचिन्नियेमुरिन्न पाशिनः ।
निधन्वेव तां ( २ ) इमि । अणुभिश्च महद्भिश्च ॥ ५७ ॥

निघृष्वैरसमायुतैः । कालैर्हरित्वमापन्नैः ।
इन्द्रायाहि सहस्रयुक् । अग्निर्विभ्राष्टिवसनः ।
वायुश्श्वेतसिकद्रुकः । संवथ्सरो विषूवर्णैः ।

नित्यस्तेऽनुचरास्तव । सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सुब्रह्मण्योम् ।
इन्द्रागच्छ हरिव आगच्छ मेधातिथेः । मेष वृषणश्वस्य मेने ॥ ५८ ॥

गौरावस्कन्दिन्नहल्यायै जार । कौशिकब्रह्मण गौतमब्रुवाण ।
अरुणाश्व इहागताः । वसवः पृथिविक्षितः ।
अष्टौदिग्वाससोऽग्नयः । अग्निश्च जातवेदाश्चेत्येते ।
तम्राश्वास्ताम्ररथाः । ताम्रवर्णास्तथाऽसिताः ।
दण्डहस्ताः ख्यादग्दतः । इतो रुद्राः पराङ्गताः ॥ ५९ ॥

उक्तꣳ स्थानं प्रमाणञ्च पुर इत । बृहस्पतिश्च सविता च ।
विश्वरूपैरिहागताम् । रथोनोदकवर्त्मना ।
अप्सुषा इति तद्द्वयोः । उक्तो वेषो वासाꣳसि च ।
कालावयवानामितः प्रतीज्या । वासात्या इत्यश्विनोः ।
कोऽन्तरिक्षे श्ब्दङ्करोतीति । वसिष्टो रौहिणो मीमाꣳसाश्चक्रे ।
तस्यैषा भवति । वाश्रेव विद्युदिति ।
ब्रह्मण उदरणमसि । ब्रह्ंअण उदीरणमसि ।
ब्रह्मण आस्तरणमसि । ब्रह्मण उपस्तरणमसि ॥ ६० ॥

[ अपक्रामत गर्भिण्यः ]
अष्टयोनीमष्टपुत्राम् । अष्टपत्नीमिमां महीम् ।
अहं वेद न मे मृत्युः । नचामृत्युरघाहरत् ।
अष्टयोन्यष्टपुत्रम् । अष्टपदिदमन्तरिक्षम् ।
अहं वेद न मे मृत्युः । नचामृत्युरघाहरत् ।
अष्टयोनीमष्टपुत्राम् । अष्टपत्नीममून्दिवम् ॥ ६१ ॥

अहं वेद न मे मृत्युः । नचामृत्युरघाहरत् ।
सुत्रामाणां महीमूषु । अदितिर्द्यौर्दितिरन्तरिक्षम् ।
अदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्चजनाः ।
अदितिर्जातमदितिजनित्वम् । अष्टौ पुत्रासो अदितेः ।
ये जातास्तन्वः परि । देवं ( २ ) उपप्रैत्सप्तभिः ॥ ६२ ॥

परा मार्ताण्डमास्यत् । सप्तभिः पुत्रैरदितिः ।
उपप्रैत्पूर्व्यं युगम् । प्रजायै मृत्यवे तत् ।
परा मार्ताण्डमाभरदिति ।ताननुक्रमिष्यामः ।
मित्रश्च वरुणश्च । धाता चार्यमा च ।

अꣳशश्च भगश्च । इन्द्रश्च विवस्वाꣳश्चेत्येते ।
हिरण्य गर्भो हꣳसश्शुचिषत् ।
ब्रह्मजज्ञानं तदित्पदमिति गर्भ प्राजापत्यः ।
अथ पुरुषः सप्त पुरुषः ॥ ६३ ॥

[ यथास्थानं गर्भिण्यः ]
योऽसौ तपन्नुदेति । स सर्वेषां भूतानां प्राणानादायोदेति ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणानादायोदगाः ।
असौ योऽस्तमेति । स सर्वेषां भूतानां प्राणानादायाऽस्तमेति ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणानादायाऽस्तङ्गाः ।
असौ य आपूर्यति । स सर्वेषां भूतानां प्राणैरापूर्यति ॥ ६४ ॥

मा मे प्रजया मा पशूनाम् । मा मम प्राणैरापूरिष्ठाः ।
असौ योऽपक्षीयति । स सर्वेषां भूतानां प्राणैरपक्षीयति ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपक्षेष्ठाः ।
अमूनि नक्षत्राणि । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत ॥ ६५ ॥

इमे मासाश्चार्धमासाश्च । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत ।
इम ऋतवः । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत ।
अयꣳ संवत्सरः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोत्सर्पति च ॥ ६६ ॥

मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोत्सृप ।
इदमहः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोत्सर्पति च ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोत्सृप ।
इयꣳरात्रिः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोत्सर्पति च ।
मा मे प्रजया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोत्सृप ।
ॐ भूर्भुवस्स्वः । एतद्वो मिथुनं मा नो मिथुनꣳरीढ्वम् ॥ ६७ ॥

अथादित्यस्याष्टपुरुषस्य ।
वसूनामादित्यानꣳस्थाने स्वतेजसा भानि ।
रुद्राणामादित्यानꣳस्थाने स्वतेजसा भानि ।
आदित्यानामादित्यानꣳस्थाने स्वतेजसा भानि ।

सता꣡ँसत्यानाम् । आदित्यान꣡ँस्थाने स्वतेजसा भानि ।
अभिधून्वतामभिघ्नताम् । वातवतां मरुताम् ।
आदित्यान꣡ँस्थाने स्वतेजसा भानि ।
ऋभूणामादित्यान꣡ँस्थाने स्वतेजसा भानि ।
विश्वेषान्देवानाम् । आदित्यान꣡ँस्थाने स्वतेजसा भानि ।
संवत्सरस्य सवितुः । आदित्यस्य स्वतेजसा भानि ।
ॐ भूर्भुवस्स्वः । रश्मयो वो मिथुनं मा नो मिथुन꣡ँरीढ्वम् ॥ ६८ ॥

आरोगस्य स्थाने स्वतेजसा भानि । भ्राजस्य  स्थाने स्वतेजसा भानि ।
पटरस्य स्थाने स्वतेजसा भानि । पतङ्गस्य स्थाने स्वतेजसा भानि ।
स्वर्णरस्य स्थाने स्वतेजसा भानि । ज्योतिषीमतस्य स्थाने स्वतेजसा भानि ।
विभासस्य स्थाने स्वतेजसा भानि । कश्यपस्य स्थाने स्वतेजसा भानि ।
ॐ भूर्भुवस्स्वः । आपो वो मिथुनं मा नो मिथुन꣡ँरीढ्वम् ॥ ६९ ॥

अथ वयोरेकादशपुरुषस्यैकादशस्त्रीकस्य ।
प्रभ्राजमानाना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
व्यवदाताना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
वासुकिवैद्युताना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
रजताना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
परुषाणा꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
श्यामाना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
कपिलाना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
अतिलोहिताना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
ऊर्ध्वाना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ॥ ७० ॥

अवपतन्ताना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
वैद्युताना꣡ँ रुद्राणा꣡ँस्थाने स्वतेजसा भानि ।
प्रभ्राजमानीना꣡ँ रुद्राणीना꣡ँस्थाने स्वतेजसा भानि ।
व्यवदातीना꣡ँ रुद्राणीना꣡ँस्थाने स्वतेजसा भानि ।
वासुकिवैद्युतीना꣡ँ रुद्राणीना꣡ँस्थाने स्वतेजसा भानि ।
रजताना꣡ँ रुद्राणीना꣡ँस्थाने स्वतेजसा भानि ।
परुषाणा꣡ँ रुद्राणीना꣡ँस्थाने स्वतेजसा भानि ।
श्यामाना꣡ँ रुद्राणीना꣡ँस्थाने स्वतेजसा भानि ।
कपिलाना꣡ँ रुद्राणीना꣡ँस्थाने स्वतेजसा भानि ।

अतिलोहितीनाꣳ रुद्राणीनाꣳस्थाने स्वतेजसा भानि ।
ऊर्ध्वानाꣳ रुद्राणीनाꣳस्थाने स्वतेजसा भानि ।
अवपतन्तीनाꣳ रुद्राणीनाꣳस्थाने स्वतेजसा भानि ।
वैद्युतीनाꣳ रुद्राणीनाꣳस्थाने स्वतेजसा भानि ।
ॐ भूर्भुवस्स्वः । रूपाणि वो मिथुनं मा नो मिथुनꣳरीढ्वम् ॥ ७१ ॥

अथाग्नेरष्टपुरुषस्य ।
अग्नेः पूर्वदिश्यस्य स्थाने स्वतेजसा भानि ।
जातवेदस उपदिश्यस्य स्थाने स्वतेजसा भानि ।
सहोजसो दक्षिणदिश्यस्य स्थाने स्वतेजसा भानि ।
अजिराप्रभव उपदिश्यस्य स्थाने स्वतेजसा भानि ।
वैश्वानरस्याऽपरदिश्यस्य स्थाने स्वतेजसा भानि ।
नर्यापस उपदिश्यस्य स्थाने स्वतेजसा भानि ।
पङ्क्तिराधसौदग्दिश्यस्य स्थाने स्वतेजसा भानि ।
विसर्पिण उपदिश्यस्य स्थाने स्वतेजसा भानि ।
ॐ भूर्भुवस्स्वः । रूपाणि वो मिथुनं मा नो मिथुनꣳरीढ्वम् ॥ ७२ ॥

दक्षिणपूर्वस्यान्दिशि विसर्पी नरकः । तस्मान्नः परिपाहि ।
दक्षिणापरस्यां दिश्यविसर्पी नरकः । तस्मान्नः परिपाहि ।
उत्तरपूर्वस्यान्दिशि विषादी नरकः । तस्मान्नः परिपाहि ।
उत्तरपरस्यान्दिश्यविषादी नरकः । तस्मान्नः परिपाहि ।
आ यस्मिन्त्सप्त वासवा इन्द्रियाणि शतक्रतवित्येते ॥ ७३ ॥

इन्द्रघोषा वो वसुभिः पुरस्तादुपदधताम् ।
मनोजवसो वः पितृभिर्दक्षिणत उपदधताम् ।
प्रचेता वो रुद्रैः पश्चादुपदधताम् ।
विश्वकर्मा व आदित्यरुत्तरत उपदधताम् ।
त्वष्टा वो रूपैरुपरिष्टादुपदधताम् ।
संज्ञानं वः पश्चादिति । आदित्यस्सर्वोऽग्निः पृथिव्याम् ।
वायुरन्तरिक्षे । सूर्यो दिवि । चन्द्रमा दिक्षु ।
नक्षत्राणि स्वलोके । एवा ह्येव । एवा ह्यग्ने ।
एवा हि वायो । एवा हीन्द्र । एवा हि पूषन् । एवा हि देवाः ॥ ७४ ॥

आपमापामपस्सर्वाः । अस्मादस्मादितोऽमुतः

अग्निर्वायुश्च सूर्यश्च । सह सञ्चस्करर्द्धिया ।
वाय्वश्वा रश्मिपतयः । मरीच्यात्मनो अद्रुहः ।
देवीर्भुवनसूवरीः । पुत्रवत्वाय मे सुत ।
महानाम्नीर्महामानाः । महसो महसस्स्वः ॥७५ ॥

देवीः पर्जन्यसूवरीः । पुत्रवत्वाय मे सुत ।
अपाऽश्न्युष्णिमपा रक्षः । अपाऽऽश्न्युष्णिमपारघम् ।
अपाघ्रामपचाऽवर्तिम् । अपदेवीरितो हित ।
वज्रन्देवीरजीताꣳश्च । भुवनन्देवसूवरीः ।
आदित्यानदितिन्देवीम् । योनिनोर्ध्वमुदीषत ॥ ७६ ॥

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
केतवो अरुणासश्च । ऋषयो वातरशनाः ।
प्रतिष्ठाꣳशतधा हि । समाहितासो सहस्रधायसम् ।
शिवा नश्शन्तमा भवन्तु । दिव्या आप ओषधयः ।
सुमृडीका सरस्वति । मा ते व्योम सन्दृशि ॥ ७७ ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।
चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति । अग्निर्वा अपामायतनम् ।
आयतनवान् भवति । योऽग्नेरायतनं वेद ॥ ७८ ॥

आयतनवान् भवति । आपो वा अग्नेरायतनम् ।
आयतनवान् भवति । य एवं वेद ।
योऽपामायतनं वेद । आयतनवान् भवति ।
वायुर्वा अपामायतनम् । आयतनवान् भवति ।
यो वायोरायतनं वेद । आयतनवान् भवति ॥ ७९ ॥

आपो वै वायोरायतनम् । आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति । असौ वै तपन्नपामायतनम् ।

आयतनवान् भवति । योऽमुष्य तपत आयतनं वेद ।
आयतनवान् भवति । आपो वा अमुष्य तपत आयतनम् ॥ ८० ॥

आयतनवान् भवति । य एवं वेद ।
योऽपामायतनं वेद । आयतनवान् भवति ।
चन्द्रमा वा अपामायतनम् । आयतनवान् भवति ।
यश्चन्द्रमस आयतनं वेद । आयतनवान् भवति ।
आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति ॥ ८१ ॥

य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति । नक्षत्राणि वा अपामायतनम् ।
आयतनवान् भवति । यो नक्षत्राणामायतनं वेद ।
आयतनवान् भवति । आपो वै नक्षत्राणामायतनम् ।
आयतनवान् भवति । य एवं वेद ॥ ८२ ॥

योऽपामायतनं वेद । आयतनवान् भवति
पर्जन्यो वा अपामायतनम् । आयतनवान् भवति ।
यः पर्जन्यस्यायतनं वेद । आयतनवान् भवति ।
आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान् भवति ।
य एवं वेद । योऽपामायतनं वेद ॥ ८३ ॥

आयतनवान् भवति । संवत्सरो वा अपामायतनम् ।
आयतनवान् भवति । यस्संवत्सरस्यायतनं वेद ।
आयतनवान् भवति । आपो वै संवत्सरस्यायतनम् ।
आयतनवान् भवति । य एवं वेद ।
योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥ ८४ ॥

इमे वै लोका अप्सु प्रतिष्ठिताः । तदेषाऽभ्यनूक्ता ।
अपाꣳरसमुदयꣳसन्न् । सूर्ये शुक्रꣳसमाभृतम् ।
अपाꣳरसस्य यो रसः । तं वो गृह्णाम्युत्तममिति ।
इमे वै लोका अपाꣳरसः । तेऽमुष्मिन्नादित्ये समाभृताः ।
जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयित्वा गुल्फदघ्नम् ॥ ८५ ॥

पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सꣳस्तीर्य । तस्मिन्विहायसे ।
अग्निं प्रणीयोपसमाधाय । ब्रह्मवादिनो वदन्ति ।
कस्मात्प्रणीतेऽयमग्निश्चीयते । साप्रणीतेऽयमप्सु ह्ययश्चीयते ।

असौ भुवनेप्यनाहिताग्निरेताः । तमभित एता अबीष्टका उपदधाति ।
अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु ॥ ८६ ॥

अथो आहुः । सर्वेषु यज्ञक्रतुष्विति ।
एतद्ध स्म वा आहुश्शण्डिलाः । कमग्निश्चिनुते ।
सत्रियमग्निश्चिन्वानः । संवत्सरं प्रत्यक्षेण ।
कमग्निश्चिनुते । सावित्रमग्निश्चिन्वानः ।
अमुमादित्यं प्रत्यक्षेण । कमग्निश्चिनुते ॥ ८७ ॥

नाचिकेतमग्निश्चिन्वानः ।
प्राणान्प्रत्यक्षेण । कमग्निश्चिनुते । चातुहोत्रियमग्निश्चिन्वानः ।
ब्रह्म प्रत्यक्षेण । कमग्निश्चिनुते । वैश्वसृजमग्निश्चिन्वानः ।
शरीरं प्रत्यक्षेण । कमग्निश्चिनुते । उपानुवाक्यमाशुमग्निश्चिन्वानः ॥ ८८ ॥

इमान् लोकान्प्रत्यक्षेण । कमग्निश्चिनुते । इममारुणकेतुकमग्निश्चिन्वानः ।
य एवासौ । इतश्चाऽमुतश्चाऽव्यतीपती । तमिति ।
योऽग्नेर्मिथूया वेद । मिथुनवान्भवति ।
आपो वा अग्नेर्मिथूयाः । मिथुनवान्भवति । य एवं वेद ॥ ८९ ॥

आपो वा इदमासन्त्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् ।
तस्यान्तर्मनसि कामस्समवर्तत । इदꣳ सृजेयमिति ।
तस्माद्यत्पुरुषो मसभिगच्छति । तद्वाचा वदति ।
तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता ।
कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ॥ ९० ॥

सतो बन्धुमसति निरविन्दन्न् । हृदि प्रतीष्या कवयो मनीषेति ।
उपैनन्तदुपनमति । यत्कामो भवति । य एवं वेद ।
स तपोऽतप्यत । स तपस्तप्त्वा । शरीरमधूनुत । तस्य यन्माꣳ समासीत् ।
ततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन्न् ॥ ९१ ॥

ये नखाः । ते वैखानसाः । ये वालाः । ते वालखिल्याः ।
यो रसः । सोऽपाम् । अन्तरतः कूर्मं भूतꣳ सर्पन्तम् ।
तमब्रवीत् । मम वैत्वङ्माꣳ सा । समभूत् ॥ ९२ ॥

नेत्यब्रवीत्।पूर्वमेवाहमिहासनिति ।
तत्पुरुषस्य पुरुषत्वम् । स सहस्रशीर्षा पुरुषः ।

सहस्राक्षस्सहस्रपात् । भूत्वोदतिष्ठत् ।
तमब्रवीत् । त्वं वै पूर्वँ समभूः ।
त्वमिदं पूर्वः कुरुष्वेति । स इत आदायापः । ॥ १३ ॥

अञ्जलिना पुरस्तादुपादधात् । एवाह्येवेति ।
तत आदित्य उदतिष्ठत् । सा प्राची दिक् ।
अथाऽरुणः । केतुर्दक्षिणत उपादधात् ।
एवाह्यग्न इति । ततो वा अग्निरुदतिष्ठत् ।
सा दक्षिणा दिक् । अथारुणः केतुः पश्चादुपदधात् ।
एवाहि वायो इति ॥ १४ ॥

ततो वायुरुदतिष्ठत् । सा प्रतीची दिक् ।
अथारुणः केतुरुत्तरत उपादधात् । एवाहीन्द्रेति ।
ततो वा इन्द्र उदतिष्ठत् । सोदीची दिक् ।
अथारुणः केतुर्मध्य उपादधात् । एवाहि पूषन्निति ।
ततो वै पूषोदतिष्ठत् । सेयन्दिक् ॥ १५ ॥

अथारुणः केतुरुपरिष्टादुपादधात् । एवाहि देवा हति ।
ततो देवमनुष्याः पितरः । गन्धर्वाप्सरसश्चोदतिष्ठन् ।
सोर्ध्वा दिक् । या विप्रुषो विपरापतन् ।
ताभ्योऽसुरा रक्षाँसि पिशाचाश्चोदतिष्ठन् । तस्मात्ते पराभवन् ।
विप्रुड्भ्यो हि ते समभवन् । तदेषाभ्यनूक्ता ॥ १६ ॥

आपो ह यद्बृहतीर्गर्भमायन् । दक्षन्दधाना जनयन्तीस्स्वयंभुम् ।
तत इमेध्यसृज्यन्त सर्गाः । अद्भ्यो वा इदँ समभूत् ।
तस्मादिदँ सर्वं ब्रह्म स्वयंम्भ्विति ।
तस्मादिदँ सर्वँ शिथिलमिवाऽध्रुवमिवाभवत् ।
प्रजापतिर्वाव तत् । आत्मनात्मानं विधाय ।
तदेवानुप्राविशत् । तदेषाभ्यनूक्ता ॥ १७ ॥

विधाय लोकान् विधाय भूतानि । विधाय सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्य । आत्मनात्मानमभि संविवेशेति ।
सर्वमेवेदमाप्त्वा । सर्वमवरुद्ध्य ।
तदेवानुप्रविशति । य एवं वेद ॥ १८ ॥

चतुष्टय्य आपो गृह्णाति । चत्वारि वा अपाँ रूपाणि ।

मेधो विद्युत् । स्तनयित्नुर्वृष्टिः । तान्येवावरुन्धे ।
आतपति वर्ष्या गृह्णाति । ताः पुरस्तादुपदधाति ।
एता वै ब्रह्मवर्चस्या आपः । मुखत एव ब्रह्मवर्चसमवरुन्धे ।
तस्मान्मुखतो ब्रह्मवर्चसितरः ॥ ९९ ॥

कूप्या गृह्णाति । ता दक्षिणत उपदधाति ।
एता वै तेजस्विनीरापः । तेज एऽवास्य दक्षिणतो दधाति ।
तस्माद्दक्षिणोऽर्धस्तेजस्वितरः । स्थावरा गृह्णाति ।
ताः पश्चादुपदधाति । प्रतिष्ठिता वै स्थावराः ।
पश्चादेव प्रतितिष्ठति । वहन्तीर्गृह्णाति ॥१०० ॥

ता उत्तरत उपदधाति ।
ओजसा वा एता वहन्तीरिवोद्गतीरिव आकूजतीरिव धावन्तीः ।
ओज एवास्योत्तरतो दधाति । तस्मादुत्तरोऽर्ध ओजस्वितरः ।
संभार्या गृह्णाति । ता मध्य उपदधाति ।
इयं वै संभार्याः । अस्यामेव प्रतितिष्ठति ।
पल्वल्या गृह्णाति । ता उपरिष्टादुपादधाति ॥ १०१ ॥

असौ वै पल्वयाः । अमुष्यामेव प्रतितिष्ठति ।
दिक्षूपदधाति । दिक्षु वा आपः ।
अन्नं वा आपः । अद्भ्यो चा अन्नञ्जायते ।
यदेवद्भ्योऽन्नञ्जायते । तदवरुन्धे ।
तं वा एतमरुणाः केतवो वातरशनाऋषयोऽचिन्वन् ।
तस्मादारुणकेतुकः ॥ १०२ ॥

तदेषाभ्यनूक्ता । केतवो अरुणासश्च ।
ऋषयो वातरशनाः । प्रतिष्ठाँ शतधाहि ।
समाहितासो सहस्रधायसमिति । शतशश्चैव सहस्रशश्च प्रतितिष्ठति ।
य एतमग्निश्चिनुते य उचैनमेवं वेद ॥ १०३ ॥

जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयति ।
आपँ सर्वत्वाय । पुष्करपर्णँरुक्मं पुरुषमित्युपदधाति ।
तपो वै पुष्करपर्णम् । सत्यँरुक्मः । अमृतं पुरुषः ।
एतावद्वा वास्ति । यावदेतत् । यावदेवास्ति ॥ १०४ ॥

तदवरुन्धे । कूर्ममुपदधाति ।

अपामेव मेधमवरुन्धे । अथो स्वर्गस्य लोकस्य समष्ट्यै ।
आपमापामपस्सर्वाः । अस्मादस्मादितोऽमुतः ।
अग्निर्वायुश्च सूर्यश्च । सहसञ्चस्करर्द्धिया इति ।
वाय्वश्वा रश्मिपतयः । लोकं पृणच्छिद्रं पृण ॥ १०५ ॥

यास्तिस्रः परमजाः । इन्द्रघोषा वो वसुभिरेवाह्येवेति ।
पञ्चचितय उपदधाति । पाङ्क्तोऽग्निः ।
यावनेवाग्निः । तञ्चिनुते ।
लोकंपृणया द्वितीयामुपदधाति । पञ्च पदा वै विराट् ।
तस्या वा इयं पादः । अन्तरिक्षं पादः । द्यौः पादः ।
दिशः पादः । परोरजाः पादः । विराज्येव प्रतितिष्ठति ।
य एतमग्निश्चिनुते । य उचैनमेवं वेद ॥ १०६ ॥

अग्निं प्रणीयोपसमाधाय । तमभित एता अबीष्टका उपदधाति ।
अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु ।
अथो आहुः । सर्वेषु यज्ञक्रतुष्विति ।
अथ हस्माहारुणस्स्वायंभुवः । सावित्रः सर्वोऽग्निरित्यननुषङ्गं मन्यामहे ।
नाना वा एतेषां वीर्याणि । कमग्निश्चिनुते ॥ १०७ ॥

सत्रियमग्निश्चिवानः । कमग्निश्चिनुते ।
सावित्रमग्निश्चिवानः । कमग्निश्चिनुते ।
नाचिकेतमग्निश्चिवानः । कमग्निश्चिनुते ।
चातुर्होत्रियमग्निश्चिवानः । कमग्निश्चिनुते ।
वैश्वसृजमग्निश्चिवानः । कमग्निश्चिनुते ॥ १०८
उपानुवाक्यमाशुमग्निश्चिवानः । कमग्निश्चिनुते ।
इममारुणकेतुकमग्निश्चिवान इति । वृषा वा अग्निः ।
वृषाणो सँस्फालयेत् । हन्येतास्य यज्ञः ।
तस्मान्नानुषज्यः । सोत्तरवेदिषु क्रतुषु चिन्वीत ।
उत्तरवेद्याँ ह्यग्निश्चीयते । प्रजाकामश्चिन्वीत ॥ १०९ ॥

प्राजापत्यो वा एषोऽग्निः । प्राजापत्याः प्रजाः ।
प्रजावान् भवति । य एवं वेद ।
पशुकामश्चिन्वीत । संज्ञानं वा एतत् पशूनाम् ।
यदापः प्शूनामेव संज्ञानेऽग्निश्चिनुते ।

प्शुमान् भवति । य एवं वेद ॥ ११० ॥

वृष्टिकामश्चिन्वीत । आपो वै वृष्टिः ।
पर्जन्यो वर्षुको भवति । य एवं वेद ।
आमयावी चिन्वीत । आपो वै भेषजम् ।
भेषजमेवास्मै करोति । सर्वमायुरेति ।
अभिचरꣳश्चिन्वीत । वज्रो वै आपः ॥ १११ ॥

वज्रमेव भ्रातृव्येभ्यः प्रहरति।स्तृणुत एनम् ।
तेजस्कामो यशस्कामः । ब्रह्मवर्चसकामस्स्वर्गकामश्चिन्वीत ।
एतावद्वा वास्ति । यावदेतत् ।
यावदेवास्ति । तदवरुन्धे ।
तस्यैतद् व्रतम् । वर्षतिन धावेत् ॥ ११२ ॥

अमृतं वा आपः । अमृतस्यानन्तरित्यै ।
नाप्सु मूत्रपुरीषङ्कुर्यात् । न निष्ठीवेत् ।
न विवसनस्स्नायात् । गुह्यो वा एषोऽग्निः ।
एतस्याग्नेरनतिदाहाय । न पुष्करपर्णानि हिरण्यंवाऽधितिष्ठेत् ।
एतस्याग्नेरनभ्यारोहाय । न कूर्मस्याश्नीयात् ।
नोदकस्याघातुकान्येनमोदकानि भवन्ति । अघातुका आपः ।
य एतमग्निश्चिनुते । य उचैनमेवं वेद ॥ ११३ ॥

इमानुकं भुवना सीषधेम । इन्द्रश्च विश्वे च देवाः ।
यज्ञश्च नस्तन्वञ्च प्रजाश्च । आदित्यैरिन्द्रस्स्सह सीषधातु ।
आदित्यैरिन्द्रस्सगणो मरुद्भिः । अस्माकं भूत्ववविता तनूनाम् ।
आप्लवस्व प्रप्लवस्व । आण्डीभवज मा मुहुः ।
सुखादीन्दुःखनिधनाम् । प्रतिमुञ्चस्व स्वां पुरम् ॥ ११४ ॥

मरीचयस्स्वायंभुवाः । ये शरीराण्यकल्पयन्न् ।
ते ते देहङ्कल्पयन्तु । मा च ते ख्यास्म तीरिषत् ।
उत्तिष्ठत मा स्वप्त । अग्निमिच्छध्वं भारताः ।
राज्ञस्सोमस्य तृप्तासः । सूर्येण सयुजोषसः ।
युवा सुवासाः । अष्टाचक्रा नवद्वारा ॥ ११५ ॥

देवानां पूरयोध्या । तस्याꣳहिरण्मयः कोशः ।
स्वर्गो लोको ज्योतिषाऽऽवृतः । यो वै तां ब्रह्मणो वेद ।

अमृतेनाऽऽवृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च ।
आयुः कीर्तिं प्रजान्ददुः । विभ्राजमानाꣳ हरिणीम् ।
यशसा सम्परीवृताम् । पुरꣳ हिरण्मयीं ब्रह्मा ॥ ११६ ॥

विवेशाऽपराजिता । पराङ्गेत्यज्यामयी ।
पराङ्गेत्यनाशकी । इहचामुत्रचान्वेति ।
विद्वान्देवासुरानुभयान् । यत्कुमारी मन्द्रयते ।
यद्योषद्यत्पतिव्रता । अरिष्टं यत्किंच क्रियते ।
अग्निस्तदनुवेधति । अशृतासश्शृतासश्च ॥ ११७ ॥

यज्वानो येऽप्ययज्वनः । स्वर्यन्तो नापेक्षन्ते ।
इन्द्रमग्निश्च ये विदुः । सिकता इव संयन्ति ।
रश्मिभिस्समुदीरिताः । अस्माल्लोकादमुष्माच्च ।
ऋषिभिरदात्पृश्निभि ।
अपेत वीत वि च सर्पतातः येऽत्रस्थ पुराणा ये च नूतनाः ।
अहोभिरद्भिरक्तुभिव्यक्तम् ॥ ११८ ॥

यमो ददात्ववसानमस्मै । नृ मुणन्तु नृपात्वर्यः ।
अकृष्टा ये च कृष्टजाः । कुमारीषु कनीनीषु ।
जारिणीषु च ये हिताः । रेतःपीता आण्डपीताः ।
अङ्गारेषु च ये हुताः । उभयान् पुत्रपौत्रकान् ।
युवेऽहं यमराजगान् । शतमिन्नु शरदः ॥ ११९ ॥

अदो यद्ब्रह्म विलबम् । पितृणाश्च यमस्य च ।
वरुणस्याश्विनोरग्नेः । मरुताश्च विहायसाम् ।
कामप्रयवणं मे अस्तु । स ह्येवास्मि सनातनः ।
इति नाको ब्रह्मिश्रवो रायो धनम् । पुत्रानापो देवीरिहाऽऽहित ॥ १२० ॥

विशीर्ष्णीङ्गृध्रशीर्ष्णीश्च । अपेतोनिर्ऋतिꣳ हथः ।
परिबाधꣳ श्वेतकुक्षम् । निजङ्घꣳ शबलोदरम् ।
स तान् वाच्यायया सह । अग्ने नाशय सन्दृशः ।
ईर्ष्यासूये बुभुक्षाम् । मन्युं कृत्यां च दीधिरे ।
रथेन किꣳशुकावता । अग्ने नाशय सन्दृशः ॥ १२१ ॥

पर्जन्याय प्रगायत । दिवस्पुत्राय मीढुषे ।
स नो यवसमिच्छतु।इदं वचः पर्जन्याय स्वराजे ।

हृदो अस्त्वन्तरन्तद्युयोत । मयोभूर्वातो विश्वकृष्टयस्सन्त्वस्मे ।
सुपिप्पला ओषधीर्देवगोपाः । यो गर्भमोषधीनम् ।
गवाङ्कृणोत्यर्वताम् । पर्जन्यः पुरूषीणाम् ॥ १२२ ॥

पुनर्मामैत्विन्द्रियम् । पुनरायुः पुनर्भगः ।
पुनर्ब्राह्मणमैतु मा । पुनर्द्रविणमैतु मा ।
यन्मेऽद्य रेतः पृथिवीमस्कान् । यदोषधीरप्यसरद्यदापः ।
इदन्तत्पुनराददे । दीर्घायुत्वाय वर्चसे ।
यन्मे रेतः प्रसिच्यते । यन्म आजायते पुनः ।
तेन माममृतं कुरु । तेन सुप्रजसङ्कुरु ॥ १२३ ॥

अद्भ्यस्तिरोधाऽजायत । तव वैश्रवणस्सदा ।
तिरोधेहि सपत्नान्नः । ये अपोऽश्नन्ति केचन ।
त्वाष्ट्रीं मायां वैश्रवणः । रथꣳ सहस्रवन्धुरम् ।
पुरुश्चक्रꣳ सहस्राश्वम् । आस्थायायाहि नो बलिम् ।
यस्मै भूतानि बलिमावहन्ति । धनङ्गावो हस्तिहिरण्यमश्वान् ॥ १२४ ॥

असाम सुमतौ यज्ञियस्य । श्रियं बिभ्रतिऽन्नमुखीं विराजम् ।
सुदर्शने च क्रोञ्चे च । मैनागे च महागिरौ ।
शतद्वाट्टारगमन्ता । सꣳहार्यन्नगरं तव ।
इति मन्त्राः । कल्पोऽत ऊर्ध्वम् । यदि बलिꣳ हरेत् ।
हिरण्यनाभये वितुदये कौबेरायायं बलिः ॥ १२५ ॥

सर्वभूतधिपतये नम इति । अथ बलिꣳ हृत्वोपतिष्ठेत ।
क्षत्रं क्षत्रं वैश्रवणः । ब्राह्मणा वयꣳ स्मः ।
नमस्ते अस्तु मा मा हिꣳसीः । अस्मात्प्रविश्यान्नमद्धीति ।
अथ तमग्निमादधीत । यस्मिन्नेतत्कर्म प्रयुञ्जीत ।
तिरोधा भूः । तिरोधा भुवः ॥ १२६ ॥

तिरोधास्स्वः । तिरोधा भूर्भुवस्स्वः ।
सर्वेषां लोकानामाधिपत्ये सीदेति । अथ तमग्निमिन्धीत ।
यस्मिन्नेतत्कर्म प्रयुञ्जीत । तिरोधा भूस्स्वाहा ।
तिरोधा भुवस्स्वाहा । तिरोधास्स्वस्स्वाहा ।
तिरोधा भूर्भुवस्स्वस्स्वाहा ।
यमिन्नस्य काले सर्वा आहुतीर् हुता भवेयुः ॥ १२७ ॥

अपि ब्राह्मणमुखीनाः । तस्मिन्नह्नः काले प्रयुञ्जीत ।
परस्सुप्तजनाद्वेपि । मास्म प्रमाद्यन्तमाध्यापयेत् ।
सर्वार्थास्सिद्ध्यन्ते । य एवं वेद ।
क्षुध्यन्निदमजानताम् । सर्वार्था न सिद्ध्यन्ते ।
यस्ते विघातुको भ्राता । ममान्तर्हृदये श्रितः ॥ १२८ ॥

तस्मा इममग्रपिण्डञ्जुहोमि । स मेऽर्थान्मा विवधीत् ।
मयि स्वाहा । राजाधिराजाय प्रसह्यसाहिने ।
नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् ।
कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय ।
महाराजाय नमः । केतवो अरुणासश्च ।
ऋषयो वातरशनाः । प्रतिष्ठाँ शतधा हि ।
समाहितासो सहस्रधायसम् । शिवानश्शन्तमा भवन्तु ।
दिव्या आप ओषधयः । सुमृडीका सरस्वति ।
मा ते व्योम सन्दृशि ॥ १२९ ॥

संवत्सरमेतद् व्रतं चरेत् । द्वौ वा मासौ ।
नियमस्समासेन । तस्मिन्नियमविशेषाः ।
त्रिषवणमुदकोपस्पर्शी । चतुर्थकालपानभक्तस्स्यात् ।
अहरहर्वा भैक्षमश्नीयात् । औदुंबरीभिस्समिद्भिरग्निं परिचरेत् ।
पुनर्मामैत्त्विन्द्रियनित्येतेनाऽनुवाकेन । उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वीत ॥ १३० ॥

असञ्चयवान् । अग्नये वायवे सूर्याय ।
ब्रह्मणे प्रजापतये । चन्द्रमसे नक्षत्रेभ्यः ।
ऋतुभ्यस्संवत्सराय । वरुणायारुणायेति व्रतहोमाः ।
प्रवर्ग्यवदादेशः । अरुणाः काण्डऋषयः ।
अरण्येऽधीयीरन् । भद्रङ्कर्णेभिरिति द्वे जपित्वा ॥ १३१ ॥

महानाम्नीभिरुदकँ सँस्पर्श्य । तमाचार्यो दद्यात् ।
शिवानश्शन्तमेत्योषधीरालभते । सुमृडीकेति भूमिम् ।
एवमपवर्गे । धेनुर्दक्षिणा । कँसं वासश्च क्षौमम् ।
अन्यद्वा शुक्लम् । यथाशक्ति वा । एवँस्वाध्यायधर्मेण ।
अरण्येऽधीयीत । तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति ॥ १३२ ॥

ॐ भद्रङ्कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ १३३ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

---

*TaittiriyAranyakam aruNaprashnaH*

pdf was typeset on February 18, 2025

Please send corrections to *sanskrit@cheerful.com*